कक्षा – अष्टमी

# संस्कृतम्

# PAPER I

अधिकतम अंक 90

## खण्डः – 'क' ( अपठित-अवबोधनम् ) (10)

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत –

रामायणम् अस्माकं धर्मग्रन्थः अस्ति। रामायणस्य रचयिता वाल्मीकिः अस्ति। अस्मिन् ग्रन्थे मर्यादा पुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तान्तः अस्ति। भगवान् श्रीरामः स्वपितुः वचनं रक्षितुं, चतुर्दश वर्षाणि वने अवसत्। श्रीरामेण सह तस्य पत्नी सीता, लक्ष्मणः च अपि वनम् अगच्छताम्। वने लंकायाः राजा रावणः सीताम् अहरत्। तत्र श्रीरामः वानराणां सहायतया रावणं हत्वा सीताम् अलभत। रामायणम् अस्माकं राष्ट्रस्य अमूल्यः निधिः अस्ति। रामायणं पठित्वा जनाः शान्तिप्रियाः सदाचारिणः च भवन्ति।

I. एकपदेन उत्तरत – ½×4=2

(i) रामायणस्य रचयिता कः अस्ति?

(ii) श्रीरामः कति वर्षाणि वने अवसत्?

(iii) श्रीरामः केषां सहायतया सीताम् अलभत?

(iv) रामायणे कस्य जीवनस्य वृत्तान्तः अस्ति?

II. पूर्णवाक्येन उत्तरत – 2×2=4

(i) श्रीरामेण सह कौ वनम् अगच्छताम्?

(ii) रामायणं पठित्वा जनाः कीदृशाः भवन्ति?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – ½×4=2

(क) 'जनाः' इति कर्तृपदस्य क्रियापदं किम्?

(i) अस्ति (ii) भवन्ति

(iii) रामायणम् (iv) पठित्वा

(ख) 'श्रीरामः' इति विशेष्यपदस्य विशेषणपदं किम्?

(i) भगवान् (ii) स्वपितुः

(iii) वने (iv) आज्ञाम्

(ग) 'अशान्तिप्रियाः' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत –

(i) जनाः (ii) शान्तिप्रियाः

(iii) सदाचारिणः (iv) अमूल्याः

(घ) 'तस्य पत्नी' अत्र तस्य इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) रामाय (ii) रावणाय

(iii) लक्ष्मणाय (iv) सीतायै

IV. गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

## खण्डः - 'ख' (रचनात्मक-कार्यम्) (10)

2. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5



मञ्जूषा -

| |
|---|
| मेघाः, वर्षाकालस्य, बालकाः, वर्षन्ति, प्रसीदन्ति, आकाशे, जनाः, मयूरः, धारयन्ति नृत्यति, छत्राणि गृहीत्वा, कर्गदनौकाः, भूमितापम्, नश्यति, तरन्ति, स्नानं कुर्वन्ति, जलम्, प्रसन्नाः। |

3. भवती मानसी। निजभगिन्याः विवाहे सम्मिलितार्थे प्रधानाचार्यं प्रति लिखिते अवकाशपत्रे रिक्तस्थानानि मञ्जूषायाः उचितपदानि चित्वा पूरयत, **पूर्णं पत्रं च उत्तरपुस्तिकायां लिखत**। ½×10=5

(1) ...............

श्रीमन्तः प्रधानाचार्याः महोदयाः

राजकीयः सर्वोदय-विद्यालयः

(2)...............

नवदिल्ली

विषय :- अवकाश-प्रदानार्थम् प्रार्थनापत्रम्

(3)...............

सविनयं निवेदनम् इदम् अस्ति यत् अहं (4)............... विद्यालये अष्टम्याः कक्षायाः छात्रा अस्मि। (5)............... मम भगिन्याः विवाहः अस्ति। अतः अहम् विद्यालयम्

आगन्तुं न (6)..............। कृपया मह्यं (7).............. अवकाशं दत्वा अनुग्रहं कुर्वन्तु।
(8)..............
भवतः आज्ञाकारिणी (9)..............
मानसी
(10).............. कक्षा

मञ्जूषा –

| |
|---|
| अद्य, अष्टमी, शिष्या, सेवायाम्, उत्तमनगरम्, महोदयाः, भवतः, शक्नोमि, एकदिवसस्य, धन्यवादः। |

## खण्डः – 'ग' ( अनुप्रयुक्त-व्याकरणम् ) (35)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा **कृत्वा पूर्णं वाक्य लिखत** – 1×3=3
   (i) <u>तत्रैव</u> मम मित्रम् आगमिष्यति।
   (ii) <u>प्रति+एकं</u> पाठं ध्यानेन पठन्तु।
   (iii) <u>तदा+एव</u> मान्यवरः संस्कृतस्य अध्यापकः कक्षां प्रविशति।

5. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयित्वा **पूर्णं वाक्यं लिखत** – ½×6=3
   (क) एते .................. सन्ति।
   (i) विद्वान् (ii) विदुषः
   (iii) विद्वांसः (iv) विद्वानाः
   (ख) श्रीरामस्य .................. नाम दशरथः आसीत्।
   (i) पितुः (ii) पितरि
   (iii) पित्रा (iv) पितरः
   (ग) आश्रमे .................. यज्ञं कुर्वन्ति।
   (i) मुनेः (ii) मुनयः
   (iii) मुनिना (iv) मुनेः
   (घ) मम .................. अयं श्रेष्ठः विचारः न अस्ति।
   (i) मत्याम् (ii) मतिम्
   (iii) मतिः (iv) मत्या
   (ङ) .................. भोजनम् आनय।
   (i) साधुना (ii) साधौ
   (iii) साधुभ्यः (iv) साधुम्
   (च) वन्दे .................. ।
   (i) मात्रा (ii) माता
   (iii) मातुः (iv) मातरम्

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयित्वा **पूर्णं वाक्यं लिखत** - 1×3=3

(क) .................. फलानि मधुराणि सन्ति।

(i) एतत् (ii) एते

(iii) एतानि (iv) एतयोः

(ख) .................. नाम माला अस्ति।

(i) तस्याम् (ii) तस्याः

(iii) तया (iv) तस्यै

(ग) .................. बालकः योग्यः अस्ति।

(i) अस्मिन् (ii) अस्याम्

(iii) अयम् (iv) अस्याः

6. (अ) अधोलिखिते कोष्ठके प्रदत्तसङ्ख्यां संस्कृतपदेन लिखित्वा **पूर्णं वाक्यं लिखत** - 1×2=2

(क) अस्याम् कक्षायां ................... छात्राः पठन्ति। (57)

(ख) मया संस्कृतविषये ................... अङ्काः प्राप्ताः। (99)

(आ) उचितम् सङ्ख्यावाचकपदेन रिक्तस्थानपूर्तिं कृत्वा **पूर्णं वाक्यं लिखत** - ½×2=1

(क) मम हस्ते .................. पुष्पाणि सन्ति।

(i) त्रयः (ii) त्रिसृभ्यः

(iii) त्रीणि (iv) त्रिषु

(ख) मार्गे .................. अश्वौ धावतः।

(i) द्वे (ii) द्वाभ्याम्

(iii) द्वयोः (iv) द्वौ

7. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा **पूर्णं वाक्यं लिखत** - 1×3=3

(i) आकाशे मेघाः .................. गर्जन्ति।

(ii) सत्यम् .................. जयते।

(iii) .................. अहं जन्तुशालां द्रष्टुम् गमिष्यामि।

मञ्जूषा - | एव, उच्चैः, श्वः |

8. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा **पूर्णं वाक्यं लिखत** - 1×3=3

(i) शिशुः मातरं <u>परिचरति</u>।

(ii) उद्याने कः <u>वि+हरति</u>?

(iii) आरक्षकः चौरं <u>प्र+हरति</u>।

9. रेखाङ्कितपदेषु विभक्तिं तत्कारणं च लिखत - 1×5=5

(i) <u>गणेशाय</u> मिष्ठान्नं रोचते।

(ii) स्वस्ति <u>युष्मभ्यम्</u>।

(iii) आचार्यः <u>छात्रे</u> स्निह्यति।

(iv) <u>गृहात्</u> बहिः कुक्कुरः तिष्ठति।

(v) <u>गृहस्य</u> पुरतः मयूरः तिष्ठति।

10. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत – 1×3=3

(i) प्रतिदिनम् (ii) हंसबकौ

(iii) उपवनम्

11. विकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयित्वा **पूर्णं वाक्यं लिखत** – 1×5=5

(क) शिष्याः गुरून् ..................।

(i) नंस्यतः (ii) नंस्यामि

(iii) नंस्यन्ति (iv) नंस्यसि

(ख) पुत्रः पितरम् .................. ।

(i) असेवेताम् (ii) असेवध्वम्

(iii) असेवावहि (iv) असेवत

(ग) त्वम् शीघ्रं कार्यं ..................?

(i) करोतु (ii) कुरूताम्

(iii) कुरु (iv) कुर्मः

(घ) अहम् प्रतिदिनं लेखं ..................।

(i) लिखसि (ii) लिखथः

(iii) लिखतः (iv) लिखामि

(ङ) वयम् प्रतिदिनं जलं ..................।

(i) पिबेत् (ii) पिबेताम्

(iii) पिबेम (iv) पिबन्तु

12. वाक्येषु धातु-प्रत्ययौ संयोज्य विभज्य वा **पूर्णं वाक्यं लिखत** – 1×4=4

(i) मूषकाः प्रतिदिनं तं श्रृगालं <u>सेवितुम्</u> तत्र आगच्छन्ति स्म।

(ii) किञ्चित् विशिष्टं <u>ज्ञा+तुमुन्</u> इच्छन्ति।

(iii) महर्षिः दयानन्दः सत्यार्थप्रकाशम् <u>रचितवान्</u>।

(iv) तेन गृहम् <u>गम्+क्त</u>।

## खण्डः – 'घ' (पठित-अवबोधनम्) (35)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

वेदधर्मं च प्रचारयन् महर्षिः भारते सर्वत्र अभ्रमत्। सत्यासत्यस्य ज्ञानार्थं सः एकं प्रसिद्धं ग्रन्थं 'सत्यार्थप्रकाशम्' अपि रचितवान्। महर्षिः दयानन्दः अतीव क्षमाशीलः अपि आसीत्। एकदा सः काशीनगरे गङ्गायाः तटे एकस्मिन् कुटीरे शिष्यैः सह अतिष्ठत्। तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्। ईर्ष्यया सः यात्री महर्षेः कुटीरम् आगत्य अकारणम् एव महर्षिं दुर्वचनानि वदति स्म।

(I) एकपदेन उत्तरत - ½×2=1

(क) महर्षिः दयानन्दः कस्याः तटे अतिष्ठत्।

(ख) महर्षिः दयानन्दः कं ग्रन्थं रचितवान्।

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) यात्री महर्षेः कुटीरस्य समीपम् आगत्य किं वदति स्म।

(ख) महर्षिः दयानन्दः कीदृशः आसीत्।

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'महर्षिः' इति पदस्य विशेष्यपदं किं प्रयुक्तम्?

(i) अतीव (ii) दयानन्दः

(iii) आसीत् (iv) अपि

(ख) 'तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्' अस्मिन् वाक्ये क्रियापदं किम्?

(i) यात्री (ii) समीपम्

(iii) अतिष्ठत् (iv) एकः

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

येषां न विद्या न तपो न दानम् ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।।

(I) एकपदेन उत्तरत - ½×2=1

(क) किं मनुष्येषु विद्यारूपी गुणः भवेत्?

(ख) श्लोके चतुर्थः गुणः कः लिखितः?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) भारभूताः जनाः कुत्र भ्रमन्ति?

(ख) जनाः मनुष्यरूपेण कथं चरन्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'अविद्या' इति पदस्य विपरीतं पदं श्लोके किम् प्रयुक्तम्?

(i) विद्या (ii) गुणः

(iii) दानम् (iv) शीलम्

(ख) 'पृथिव्याम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(i) भुवि (ii) शीलम्

(iii) तपः (iv) भारभूताः

15. अधोलिखितं नाट्यांशं पठित्वा उत्तराणि लिखत -

अन्यः छात्रः - किम् एते महोदयाः अस्माकं राष्ट्रस्य 'वैज्ञानिक-परामर्शदातारः' अपि अभवन्?

आचार्यः - आम्! अष्टाधिकनवति-एकोनविंशतिशततमे वर्षे (1998) एतेषां महोदयानां नियुक्तिः अस्मिन् पदे अभवत्।

अन्या छात्रा – अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानम् 'भारतरत्नम्' अपि एते महोदया: प्राप्तवन्त:।

आचार्य: – आम्। सप्तनवति-अधिक-एकोनविंशतिशततमे वर्षे (1997) महोदय: इदं सम्मानं प्राप्तवान्। अयं महानुभाव: स्वगुणानुरूपम् अस्माकं राष्ट्रस्य राष्ट्रपते: पदम् अलङ्कृतवान्। अतीव प्रेरणादायकम् अस्ति अस्य महोदयस्य जीवनम्।

(I) एकपदेन उत्तरत – ½×2=1

(क) अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानम् किम् अस्ति?

(ख) अस्य महोदयस्य जीवनं कीदृशम् अस्ति।

(II) एकवाक्येन उत्तरत – 1×2=2

(क) अयं महानुभाव: स्वगुणानुरूपम् अस्माकं राष्ट्रस्य कस्य पदम् अलङ्कृतवान्?

(ख) एते महोदया: भारतरत्नम् कदा प्राप्तवन्त:?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'भारतरत्नम् अपि एते महोदया:' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) भारतरत्नम् (ii) एते

(iii) अपि (iv) महोदया:

(ख) 'एते महोदया: अस्माकं राष्ट्रस्य वैज्ञानिक-परामर्शदातार:' अपि अभवन्। अस्मिन् वाक्ये क्रियापदं किम्?

(i) महोदया: (ii) अभवन्

(iii) अस्माकम् (iv) अपि

16. मञ्जूषायां प्रदत्तै: पदै: रिक्तस्थानानि पूरयित्वा **भावार्थं** लिखत – 1×4=4

(अ) अर्धो घटो नूनम् उपैति घोषम्।

भावार्थ: – अर्ध: पूरित: (1).................. एव अधिकं शब्दं करोति। एवमेव य: विद्वान् न अस्ति स: एव ज्ञानस्य (2) .................. करोति।

(आ) गुणी गुणं वेत्ति न वेत्ति निर्गुण:।

भावार्थ: – गुणवान् जन: एव वस्तूनां जनानां वा गुणस्य (1) .................. जानाति मूर्ख: न। मूर्खा: जना: विदुष: मूल्यं न (2) ..................।

मञ्जूषा – | महत्त्वम्, घट:, जानन्ति, प्रदर्शनम् |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदै: रिक्तस्थानानि पूरयित्वा **अन्वयं लिखत** – ½×8=4

(अ) वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मी: दानवती यस्य, सफलं तस्य जीवितम्।।

अन्वय: – यस्य वाणी (1).................. यस्य (2).................. श्रमवती यस्य लक्ष्मी: (3).................. (अस्ति)। तस्य जीवितं (4).................. (भवति)।

(आ) प्रियवाक्य-प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।
अन्वयः - सर्वे (1).................. प्रियवाक्य-प्रदानेन (2)..................। तस्मात् तदेव (3).................. वचने का (4).................. (भवेत्)।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य **पूर्णानि वाक्यानि पुनः लिखत। केवलं क्रमसङ्ख्या न लेखनीया** - 1×5=5

(क) शृगालः सूर्यं प्रति मुखं कृत्वा तिष्ठति।
(ख) शृगालः मूषकवृन्दं दृष्टवान्।
(ग) सर्वे मूषकाः चकिताः अभवन्।
(घ) शृगालं हृष्टं पुष्टं दृष्ट्वा मूषकाः चिन्तितवन्तः।
(ङ) मूषकाः स्वतीक्ष्णदन्तैः शृगालस्य नाशम् अकुर्वन्।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा **पूर्णानि वाक्यानि लिखत। केवलं प्रश्नवाचकं पदं न लेखनीयम्**? 1×5=5

(क) जनाः कार्येषु आलस्यं न कुर्वन्तु।
(ख) मूषकाः शृगालस्य उपरि आक्रमणम् अकुर्वन्।
(ग) शृगालः मूषकान् अनुसरति।
(घ) गुरोः आज्ञा पालनीया एव भवति।
(ङ) छात्राः गुरूणाम् देवतावत् सेवां कुर्वन्तु।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कुरुत - ½×4=2

| | |
|---|---|
| (क) प्रियवाक्यप्रदानेन | (i) जीवनम् |
| (ख) जीवितम् | (ii) पठनपाठनाभ्याम् |
| (ग) वित्तम् | (iii) धनम् |
| (घ) स्वाध्यायप्रवचनाभ्याम् | (iv) मधुरभाषणेन |

# PAPER II

अधिकतम अंक 90

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

वैज्ञाकनिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात! चलभाषितयन्त्रम् (मोबाइल, सेलफोन) तादृशम् एव लोकप्रियं यन्त्रम्। बालाः, वृद्धाः, युवकाः, पुरुषाः महिलाः नागरिकाः ग्रामीणाः वा सर्वेषाम् एव एतत् कर्णभूषणम् जातम्। जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु, अन्यसभासु वा अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

I. एकपदेन उत्तरत - 1×2=2

(i) वर्तमानकाले किं लोकप्रियं सञ्चार-साधनम्?

(ii) यन्त्रस्य दुष्प्रयोगेण कस्य शान्तिः नश्यति?

II. पूर्णवाक्येन उत्तरत - 2×2=4

(i) अविवेकपूर्णः अस्य प्रयोगः कुत्र व्यवधानं करोति?

(ii) के बुद्धिमन्तः भवन्ति?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा - ½×2=2

(क) 'सुविधा' इति पदस्य विशेषणपदं किम्?

(i) एतत्  (ii) अधिकतमा

(iii) सन्देशप्रेषणे  (iv) येन

(ख) 'सर्वेषाम्' एव एतत् कर्णभूषणं जातम्' अस्मिन् वाक्ये किम् अव्ययपदम्?

(i) एतत्  (ii) जातम्

(iii) सर्वेषाम्  (iv) एव

(ग) 'व्यवस्था' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(i) अव्यवस्था (ii) व्यवस्थम्

(iii) व्यवधानं (iv) अविवेक:

(घ) 'तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति? अस्मिन् वाक्ये क्रियापदं किम्?'

(i) तस्य (ii) शान्तिः

(iii) नश्यति (iv) जीवनस्य

IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत। 2

## खण्ड - 'ख' (रचनात्मक-कार्यम्) (10)

2. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत। 1×5=5



मञ्जूषा -

उद्यानस्य, आम्रस्य, सेवफलस्य, पुष्पाणि, वृक्षाः, क्रीडति, जलप्रपातः, बालकः, पादपाः, फलानि, मालाकारः, फलन्ति, हरीतिमा, जलम्, सिञ्चति, विकसन्ति।

3. भ्रातरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायाः उचितपदानि चित्वा पूरयत, पत्रं च उत्तरपुस्तिकायां पुनः लिखत। ½×10=5

परीक्षाभवनात्
तिथिः ...............

प्रिय अतुल!
सप्रेम (i).................।

अत्र कुशलम् (ii)................. । भवान् तु (iii)................. एव यत् मानवजीवनस्य प्रतिपलं (iv)................. अस्ति। विश्वे प्रकृतेः संपूर्णानि कार्याणि निश्चितसमये (v).................। उचित समये यदि वृष्टिः न भवेत् तदा सर्वं क्षेत्रं शुष्येत्। तथैव बाल्यकाले यदि छात्रः न पठति तदा असौ समस्त-जीवने (vi)................. करोति। समयः तस्य एव जनस्य कार्येषु सहायतां करोति यः (vii)................. सदुपयोगं करोति। गते काले शोकः (viii).................। समयः कदापि कस्यचिदपि (ix)................. न करोति। अतः सदा समयस्य सदुपयोगः करणीयः।

भवतः (x).................
अमितः

मञ्जूषा –

| |
|---|
| निरर्थकः, भ्राता, समयस्य, तत्रास्तु, जानाति, महत्त्वपूर्णम्, भवन्ति, प्रतीक्षाम्, नमो नमः, पश्चात्तापम्। |

## खण्ड – 'ग' (अनुप्रयुक्त-व्याकरणम्) (35)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेष सन्धिं सन्धिच्छेदं वा कुरुत – 1×3=3
   (i) श्लोकस्य <u>अनु+अयं</u> लिखन्तु।
   (ii) <u>तत्र+एकः</u> बालकः पठतिः।
   (iii) त्वम् <u>प्रत्येकं</u> कार्यं शीघ्रं कुरू।

5. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – ½×6=3
   (क) ते .................. नमन्ति।
   (i) मुनेः (ii) मुनीन्
   (iii) मुनिः (iv) मुनिना
   (ख) अस्याम् सभायाम् सर्वे .................. सन्ति।
   (i) विदुषः (ii) विद्वांसः
   (iii) विदुषाम् (iv) विद्वद्भ्यः
   (ग) तव .................. नाम किम् अस्ति?
   (i) पित्रा (ii) पितुः
   (iii) पिता (iv) पितरम्

(घ) वने .................. आश्रमाः सन्ति।

(i) साधवः (ii) साधूनाम्

(iii) साधुः (iv) साधवे

(ङ) मम .................. एका अध्यापिका अस्ति।

(i) मातरि (ii) मातुः

(iii) माता (iv) मातरः

(च) छात्राः .................. कार्यं कुर्युः।

(i) मती (ii) मत्या

(iii) माता (iv) मतयः

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत – 1×3=3

(क) .................. सरोवरस्य जलं स्वच्छम् अस्ति।

(i) अस्य (ii) अस्मिन्

(iii) इदम् (iv) इमे

(ख) .................. विद्यालयस्य महत्तां तु सर्वे जानन्ति।

(i) एषः (ii) एते

(iii) एतस्य (iv) एषस्मै

(ग) .................. किं वदतः?

(i) तत् (ii) सः

(iii) तौ (iv) ताः

6. (अ) कोष्ठके प्रदत्तसङ्ख्यां संस्कृतपदेन रिक्तस्थानयोः लिखत – 1×3=2

(क) .................... (83) छात्राः भ्रमणाय गच्छन्ति।

(ख) मम पार्श्वे .................... (65) रूप्यकाणि सन्ति।

(आ) उचितं सङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत – ½×2=1

(क) मुखे .................. नेत्रे स्तः

(i) द्वौ (ii) द्वे

(iii) द्वि (iv) द्वा

(ख) .................. नराः वर्तालापं कुर्वन्ति।

(i) त्रीणि (ii) तिस्रः

(iii) त्रीभिः (iv) त्रयः

7. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत – 1×3=3

(i) श्रीगुरवे ..................।

(ii) छात्राः क्रीडाक्षेत्रे .................. वदन्ति।

(iii) त्वम् .................. मम माता असि।

मञ्जूषा – | उच्चैः, नमः, एव |

8. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत – 1×3=3

(i) सः माम् <u>परि+चिनोति</u>।

(ii) शिशुः <u>विलपति</u>।

(iii) मम मातुलः दिल्लीनगरे <u>निवसति</u>।

9. रेखाङ्कितपदेषु विभक्तिं तत्कारणं च लिखत – 1×5=5

(i) नृपः <u>भिक्षुकाय</u> धनं यच्छति।

(ii) अध्यापकः <u>शिष्येषु</u> विश्वसिति।

(iii) <u>धनात्</u> ऋते न सुखम्।

(iv) <u>शाखायाः</u> उपरि खगाः उपविशन्ति।

(v) <u>विष्णवे</u> नमः।

10. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत – 1×3=3

(i) कोकिलमयूरौ (ii) यथाविधि

(iii) उपवनम्

11. उचितं धातुरूपं विकल्पेभ्यः चित्वा वाक्येषु रिक्तस्थानानि पूरयत – 1×5=5

(क) छात्राः यथाकालं स्वकार्यम् ...................।

(i) करिष्यतः (ii) करष्यिति

(iii) करिष्यन्ति (iv) करिष्यसि

(ख) यूयम् सदैव सत्यम् ................... ।

(i) वदत (ii) वद

(iii) वदतु (iv) वदतम्

(ग) रमेशः पितरौ ...................।

(i) असेवत् (ii) असेवन्त

(iii) असेवत (iv) असेवेताम्

(घ) आवाम् एकं लेखम् ...................।

(i) लिखावः (ii) लिखामि

(iii) लिखामः (iv) लिखथः

(ङ) रात्रौ बालकाः दुग्धं ...................।

(i) पिबेत् (ii) पिबेयुः

(iii) पिबेः (iv) पिबेताम्

12. वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत – 1×4=4

(i) सः कस्मै अपि धनं .................... (दा+तुमुन्) न इच्छति।

(ii) छात्राः पुस्तकानि <u>पठितवन्तः</u>। (....................+....................)

(iii) विष्णुशर्मणा पञ्चतन्त्रम् .................... (लिख्+क्त)।

(iv) अहं .................... (खेल्+तुमुन्) न गमिष्यामि।

## खण्ड - 'घ' ( पठित-अवबोधनम् ) (35)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

स: शिष्य: अचिन्तयत्- "स: यात्री तु प्रतिदिनम् अत्र आगत्य अकारणम् एव कटुवचनानि कथयति। किमर्थं तदा तस्मै एतानि फलानि।" शिष्यस्य भावम् अवगत्य महर्षि: अकथयत् - "चिन्तां मा कुरू। तस्मै यात्रिणे फलानि दत्वा आगच्छ।" गुरो: आज्ञया शिष्य: यात्रिण: समीपं गत्वा अवदत्- "अस्माकं स्वामिना भवत: कृते एतानि फलानि प्रेषितानि। कृपया स्वीकरोतु।"

(I) एकपदेन उत्तरत - ½×2=1

(क) यात्री महर्षिं प्रति किं कथयति स्म?

(ख) स्वामि-दयानन्देन तस्मै यात्रिणे कानि प्रेषितानि?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) शिष्य: यात्रिण: समीपं गत्वा किम् अवदत्?

(ख) शिष्यस्य भावम् अवगत्य महर्षि: किम् अकथयत्?

(III) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत - 1×2=2

(क) अनुच्छेदे 'दूरम्' पदस्य किं विलोमपदं लिखितम्?

(i) समीपम् (ii) निकषा

(iii) निकटम् (iv) समीपे

(ख) 'स: शिष्य उचिन्तयत्' अत्र क्रियापदं किम्?

(i) स: (ii) शिष्य:

(iii) अचिन्तयत् (iv) न क्ञ्चिन

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मी: दानवती यस्य, सफलं तस्य जीवितम्।।

(I) एकपदेन उत्तरत - ½×2=1

(क) मनुष्स्य का रसवती भवेत्?

(ख) नरस्य क्रिया कीदृशी भवेत्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) का दानवती भवेत्?

(ख) कस्य जीवनं सफलं भवति?

(III) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत - 1×2=2

(क) 'वाणी' इति पदस्य विशेषणं श्लोके किं प्रयुक्तम्?

(i) दानवती (ii) श्रमवती

(iii) रसवती (iv) लक्ष्मी:

(ख) श्लोके 'धनम्' पदस्य क: पर्याय: लिखित:?

(i) लक्ष्मी: (ii) जीवितम्

(iii) वित्तम् (iv) क्रिया

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्ननानाम् उत्तराणि लिखत – 5

एका छात्रा – मान्यवर! एतेषां महोदयानां शिक्षा कुत्र अभवत्?

आचार्यः – प्रियाः छात्राः! अस्य महोदयस्य आरम्भिकी शिक्षा 'रामेश्वरम्' क्षेत्रे एव 'श्वार्ट्ज हाई स्कूल नामके विद्यालये अभवत्। स्नातकस्तरीया शिक्षा 'तिरूची' क्षेत्रस्य सेंट जोसैफ कॉलेज नामके महाविद्यालये अभवत्। पुनः 'मद्रास तकनीकी संस्थाने' (मद्रास इन्स्टीट्यूट ऑफ टैक्नोलॉजी वैमानिकीं विद्याम् अधीतवान्। अति परिश्रमेण अध्ययनं कृत्वा महोदयः रक्षावैज्ञानिकस्य पदम् अलङ्कृतवान्। अनेन महोदयेन रक्षाक्षेत्रे अनेकानि अभूतपूर्वाणि कार्याणि कर्त्तव्यनिष्ठया कृतानि। नवीनैः शोधकार्यैः प्रक्षेपास्त्राणि निर्माय महोदयः अस्माकं प्रियं भारतं प्रक्षेपास्त्रक्षेत्रे सम्पन्नं राष्ट्रम् अकरोत्।

(I) एकपदेन उत्तरत – ½×2=1

(क) डॉ. कलाममहोदयः अति परिश्रमेण अध्ययनं कृत्वा कस्य पदम् अलङ्कृतवान्?

(ख) श्री अब्दुलकलाममहोदयः कस्मिन् क्षेत्रे राष्ट्रं सम्पन्नम् अकरोत्?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) डॉ. कलाममहोदयस्य आरम्भिकी शिक्षा कुत्र अभवत्?

(ख) सः कुत्र वैमानिकीं विद्याम् अधीतवान्?

(III) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत – 1×2=2

(क) 'नवीनैः' अस्य किम् विशेष्यपदं अत्र प्रयुक्तम्?

(i) अनेकानि (ii) कृतानि

(iii) शोधकार्यैः (iv) कार्याणि

(ख) 'अति परिश्रमेण अध्ययनं कृत्वा महोदयः रक्षावैज्ञानिकस्य पदम् अलङ्कृतवान्' अत्र अव्ययपदम् किम् अस्ति?

(i) अध्ययनम् (ii) अति

(iii) पदम् (iv) महोदयः

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा भावार्थं लिखत – 1×4=4

(अ) अधो घटो नूनम् उपैति घोषम्।

भावार्थः – अर्धः पूरितः घटः एव अधिकं (1).................. करोति। एवमेव यः विद्वान् न अस्ति। सः एव (2).................. प्रदर्शनं करोति।

(आ) चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।

भावार्थः – मनुष्यस्य जीवनं सदैव दुःखमयं न भवति। एवमेव सदैव (1).................. अपि न भवति। मनुष्यस्य जीवने सुखस्य दुःखस्य च स्थितिः चक्रम् इव भवति। सुखानि दुःखानि च (2) ..................आगच्छन्ति गच्छन्ति वा।

मञ्जूषा – 

| क्रमानुसारेण, सुखमयम्, शब्दं, ज्ञानस्य |
|---|

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः अन्वयं पूरयत – ½×8=4

(अ) प्रियवाक्य – प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।
अन्वयः – (1).............. जन्तवः प्रियवाक्य-प्रदानेन तुष्यन्ति। तस्मात् (2).............
वक्तव्यं, (3)..............का (4)..............(अस्ति)।

(आ) वृत्तं यत्नेन संरक्षेत् वित्तम् आयाति याति च।
अक्षीणः वित्ततः क्षीणः वृत्ततः तु हतो हतः।।
अन्वयः – वृत्तं यत्नेन (1).............. वित्तं (तु जीवने) आयाति (2)..............च।
वित्ततः क्षीणः (3).............. अक्षीणः (4).............. हतः (तु) हतः (एव)।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारम् संयोज्य पूर्णानि वाक्यानि लिखत, केवलं क्रमसङ्ख्या न लेखनीया – 1×5=5

(क) मूषकाः स्वतीक्ष्णदन्तैः शृगालम् अनश्यन्।
(ख) शृगालः सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति।
(ग) शृगालः प्रतिदिनम् एकं मूषकं खादति स्म।
(घ) शृगालः मूषकवृन्दं दृष्ट्वा तम् अनुसरति।
(ङ) मूषकाः शृगालं दृष्ट्वा चकिताः भवन्ति।

19. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णानि वाक्यानि लिखत, केवलं प्रश्नवाचकपदं न लेखनीयम् – 1×5=5

(क) यात्री <u>महर्षेः</u> कुटीररस्य समीपम् आगच्छत्।
(ख) डॉ. कलाममहोदयः <u>प्रक्षेपयानानां</u> निर्माणम् अकरोत्।
(ग) <u>विद्याहीनाः</u> पृथिव्यां भारः इव भवन्ति।
(घ) जनाः <u>कार्येषु</u> आलस्यं न कुर्वन्तु।
(ङ) <u>शृगालः</u> भोजनाय भ्रमति स्म।

20. अधोलिखितशब्दानां मेलनम् उचितैः अर्थैः सह कुरुत – ½×4=2

| | |
|---|---|
| (i) चर | ज्ञानम् |
| (ii) विद्या | कुम्भः |
| (iii) आर्यम् | पालय |
| (iv) घटः | श्रेष्ठम् |

# PAPER III

अधिकतम अंक 100

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

क्रोधः मानवजीवनस्य शत्रुः अस्ति। क्रोधेन मानवः अनेकानि अनुचितकार्याणि करोति। अद्यत्वे वयं पश्यामः यत् क्रोधस्य कारणात् अनेके कलहाः भवन्ति। अनेनैव जनाः अन्येषां महतीं हानिम् अपि कुर्वन्ति। क्रोधेन शरीरे अनेके रोगाः भवन्ति। अनेन मनुष्यस्य विचारशक्तिः नष्टा भवति। क्रोधी जनः समाजे प्रतिष्ठां न लभते। परिवारस्य जनाः अपि तस्य सम्मानं न कुर्वन्ति। अनेन मित्रता अपि नश्यति, मित्राणि दूरं गच्छन्ति। क्रोधेन लाभः न भवति अपितु हानिरेव भवति। अतः क्रोधः न करणीयः।

I. एकपदेन उत्तरत - ½×4=2

(क) कः मानवजीवनस्य शत्रुः अस्ति?

(ख) क्रोधेन कस्य विचारशक्तिः नष्टा भवति?

(ग) के क्रोधेन अन्येषां महतीं हानिम् अपि कुर्वन्ति?

(घ) कस्य कारणात् कलहाः भवन्ति?

II. पूर्णवाक्येन उत्तरत - 1×2=2

(क) कः समाजे प्रतिष्ठां न लभते?

(ख) क्रोधेन मानवः किं करोति?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

IV. निर्देशानुसारम् उत्तरत - 1×4=4

(क) 'हानिम्' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(ख) 'मित्राणि दूरं गच्छन्ति' अस्मिन् वाक्ये 'गच्छन्ति' इति क्रियापदस्य कर्ता कः?

(ग) 'मित्रम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(घ) 'अनेन मित्रता अपि नश्यति' अस्मिन् वाक्ये अव्ययपदं किम्?

## खण्डः - 'ख' ( रचनात्मक-कार्यम् ) (10)

2. मित्रं प्रति लिखिते पत्रे मञ्जूषायाः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत। ½×10=5

प्रिय मित्र रमेश!

सादरं (1) ...............।

अत्र कुशलं (2) ...............। भवतः पत्रं (3) ...............। पत्रं पठित्वा अहम् अतीव (4) ............... अस्मि यत् भवान् (5) ............... संस्कृत-विषये शतम् अङ्कान् प्राप्तवान्। भवता लिखितम् आसीत् यत् भवान् नवमकक्षायां संस्कृतविषयं ग्रहीतुम् इच्छति। अहं तु कथयामि भवान् संस्कृतमेव (6) ...............। अद्य विदेशेषु अपि छात्राः (7) ............... पठन्ति। वैज्ञानिकाः, चिकित्सकाः, विद्वांसः च अस्य महत्त्वं (8) ............... संस्कृतं पठितुम् इच्छन्ति। संस्कृतस्य युगं पुनः आगच्छति। अतः (9) ............... पूर्वमेव सज्जाः भवेम।

भवतः (10) ...............

रोहितः

मञ्जूषा :

| |
|---|
| पठतु, नमः, वार्षिकपरीक्षायां, वयं, मित्रम् |
| प्राप्तम्, प्रसन्नः, तत्रास्तु, संस्कृतं, ज्ञात्वा |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5



मञ्जूषा :

| |
|---|
| उद्यानम्, सरोवरः, वृक्षाः, खगाः, मेघः |
| आकाशे, तरति, हंसः, बालाः, मनोहरम् |

## खण्डः - 'ग' ( अनुप्रयुक्तं व्याकरणम् ) (40)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत - 1×4=4

(क) हिमालयः भारतस्य रक्षकः अस्ति।

(ख) सूर्य+उदये तमः नश्यति।

(ग) आचार्यः प्रत्येकं छात्रं प्रश्नं पृच्छति।

(घ) श्लोकवाचनं तथा+एव करणीयं यथा आचार्यः शिक्षयति।

5. कोष्ठकेषु प्रदत्तशब्दानाम् उचितरूपैः रिक्स्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) वने ........................ आश्रमः अस्ति। (साधु)

(ख) मम ........................ शिक्षिका अस्ति। (मातृ)

(ग) ........................ वनं प्रति गच्छन्ति। (मुनि)

(घ) ........................ बालस्य नाम श्रेयः अस्ति। (तत्)

(ङ) अहम् ........................ विद्यालये पठामि। (एतत्)

6. अङ्कानां स्थाने संस्कृत-सङ्ख्यावाचकं पदं प्रयुज्य पूर्णं वाक्यं लिखत - 1×4=4

(क) क्रीडाक्षेत्रे ........................ बालौ क्रीडतः। (2)

(ख) मार्गे ........................ जनाः धावन्ति। (95)

(ग) ........................ छात्राः पुस्तकमेलकं गच्छन्ति। (57)

(घ) वने ........................ मृगाः भ्रमन्ति। (78)

7. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत पूर्णं वाक्यं च लिखत- 1×5=5

(क) ग्रामात् ........................ वनम् अस्ति।

(ख) यदा वृष्टिः भवति ........................ कृषकाः आनन्दिताः भवन्ति।

(ग) ........................ अहं संस्कृतं पठामि।

(घ) सत्यम् ........................ जयते।

(ङ) ........................ भारतस्य नाम आर्यावर्तः आसीत्।

मञ्जूषा - | अधुना, तदा, पुरा, एव, बहिः |

8. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत - 1×4=4

(क) जनकः आपणात् मिष्ठान्नम् आनयति।

(ख) वानरः मनुष्यम् अनु+करोति।

(ग) अध्यापिका कक्षां प्रविशति।

(घ) कृषकः क्षेत्रात् गां नि+वारयति।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - 1×5=5

(क) श्रान्तः पथिकः वृक्षस्य अधः विश्रामं करोति।

(ख) जनाः नगरं प्रति गच्छन्ति।

(ग) विद्वान् वेदपाठे निपुणः अस्ति।

(घ) भोजनात् अनन्तरं जलं न पातव्यम्।

(ङ) बालः जनकेन सह आपणं गच्छति।

10. अधोलिखितानां समस्तपदानां समासानां नामानि लिखत - ½×6=3

(क) प्रतिगृहम्

(ख) चक्रपाणिः

(ग) उपनगरम्

(घ) यथाशक्ति

(ङ) नीलकण्ठः

(च) दशाननः

11. कोष्ठकेषु प्रदत्तधातूनाम् उचितरुपैः रिक्तस्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) त्वं सदा सत्यं ...................। (वद् - लोट्लकारे)

(ख) मृगाः सरोवरे जलं ...................। (पा - लट्लकारे)

(ग) छात्रः पुरस्कारम् ...................। (लभ् - लङ्लकारे)

(घ) वयं गृहकार्यं ...................। (कृ - लृट्लकारे)

(ङ) सः सुन्दरं लेखं ...................। (लिख् - विधिलिङ्लकारे)

12. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत - 1×5=5

(क) छात्राः पठ्+क्त्वा आगच्छन्ति।

(ख) बालः खेल्+तुमुन् इच्छति।

(ग) नरः उच्चैः हसितवान्।

(घ) व्यासेन महाभारतं लिखितम्।

(ङ) कृषकः भोजनं खादितुं गृहं गच्छति।

## खण्डः - 'घ' ( पठित-अवबोधनम् ) (40)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

एकदा एकस्मिन् वने एकः श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म। तदैव सः मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति। तस्य मूषकसमूहस्य राजा हृष्टः पुष्टः आसीत्। श्रृगालः मूषकसमूहम् अनुसरति। तान् मूषकान् खादितुम् इच्छन् सः मूषकाणां बिलस्य समीपं गच्छति। सः श्रृगालः किञ्चित् चिन्तयित्वा मूषकाणां बिलात् बहिः सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति। अन्यस्मिन् दिवसे प्रातः मूषकाः श्रृगालं दृष्ट्वा चकिताः भवन्ति।

(I) एकपदेन उत्तरत - ½×2=1

(क) कः मूषकसमूहम् अनुसरति?

(ख) श्रृगालः किं प्राप्तुम् इतस्ततः भ्रमति स्म?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) मूषकान् खादितुम् इच्छन् श्रृगालः कुत्र गच्छति?

(ख) मूषकसमूहस्य राजा कीदृशः आसीत्?

(III) निर्देशानुसारम् उत्तरत - 2

(क) 'एकः श्रृगालः' अनयोः पदयोः विशेषणपदं किम्?

(ख) 'मूषकाः श्रृगालं दृष्ट्वा चकिताः भवन्ति' अस्मिन् वाक्ये 'भवन्ति' इति क्रियापदस्य कर्ता कः?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

क्षुधासमं नास्ति शरीरपीडनम्
चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणम्
क्षमासमं नास्ति शरीररक्षणम्।

(I) एकपदेन उत्तरत - ½×2=1

(क) चिन्तासमं किं नास्ति?

(ख) विद्यासमं किं नास्ति?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) कया समं शरीरस्य रक्षणं नास्ति?

(ख) क्षुधासमं किं नास्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'विद्यासमं शरीरभूषणम् न अस्ति' अस्मिन् वाक्ये 'अस्ति' इति क्रियापदस्य कर्ता कः?

(ख) 'कष्टम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्।

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

सर्वे छात्राः कक्षायां परस्परं चर्चायां मग्नाः सन्ति। श्यमपट्टे एका सूक्तिः लिखिता अस्ति। 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' (तदैव मान्यवरः संस्कृतस्य अध्यापकः कक्षां प्रविशति।)

सर्वे छात्राः - (उत्थाय) वयं प्रणमामः मान्यवर!

आचार्यः - सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।
(सर्वे उपविशन्ति। जिज्ञासया आचार्यं पश्यन्ति।)

आचार्यः - (सर्वान् दृष्ट्वा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे - (मिलित्वा) आम् मान्यवर! वयम् अस्माकम् पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः - अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्तः पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

सवे - आम् मान्यवर!

(I) एकपदेन उत्तरत - ½×2=1

(क) के चर्चायां मग्नाः सन्ति?

(ख) गुणिषु के पूजास्थानम्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) छात्राः कथम् आचार्यं पश्यन्ति।

(ख) के विशिष्टं ज्ञातुम् इच्छन्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'मध्ये-मध्ये भवन्तः पृच्छन्तु' अस्मिन् वाक्ये 'भवन्तः' इति कर्तृपदस्य क्रियापदं किम्?

(ख) 'सामान्यम्' इति पदस्य विलोमपदं गद्यांशे किम् अस्ति?

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत - ½×10=5

(क) सर्वस्य लोचनं शास्त्रम्।

भावार्थः - शास्त्राणां (1) .................. एव मनुष्यस्य (2) .................. नेत्रम् अस्ति। ज्ञानशक्त्या एव मानवस्य (3) .................. सिध्यन्ति। अतः (4) .................. ज्ञानं प्राप्तुं सदैव (5) .................. भवेयुः।

मञ्जूषा - | वास्तविकं, शास्त्राणां, कार्याणि, तत्पराः, ज्ञानम् |

(ख) अङ्गीकृतं सुकृतिनो न परित्यजन्ति।

भावार्थः - सज्जनाः (1) .................. स्वीकृत्य सम्पूर्णं (2) ..................। 'कार्यं (3) ................. अस्ति' इति (4) ................. कदापि (5) ................. न।

मञ्जूषा - | चिन्तयित्वा, कार्यं त्यजन्ति, कठिनम्, कुर्वन्ति |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत - ½×10=5

(क) जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

अन्वयः - सत्सङ्गतिः धियः जाड्यं (1) .................., वाचि सत्यं (2) .................. मानोन्नतिं दिशति, (3) .................. अपाकरोति, चेतः (4) .................. दिक्षु कीर्तिं तनोति, कथय सत्सङ्गतिः (5) .................. किं न करोति?

(ख) पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः

परोपकाराय सतां विभूतयः।।

अन्वयः – नद्यः स्वयम् एव अम्भः न (1) .................., वृक्षाः स्वयं (2) .................. न खादन्ति, (3) .................. सस्यं खलु न (4) .................. सतां विभूतयः (5) .................. (भवन्ति)।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। केवलं क्रमसङ्ख्या न लेखनीया – 1×4=4

(क) एकदा एकः नागरिकः महात्मानं रात्रिभोजाय निमन्त्रितवान्।

(ख) नागरिकः अतिथेः सूचनां प्राप्य अपि बहिः न आगतः।

(ग) किञ्चित् कालं प्रतीक्षां कृत्वा महात्मा स्वकुटीरम् आगच्छत्।

(घ) महात्मा नागरिकस्य निवेदनं स्वीकृत्य तस्य गृहम् अगच्छत्।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत केवलं प्रश्नवाचकपदं न लेखनीयम्? 1×5=5

(क) महर्षिः दयानन्दः फलानि प्रेषयति।

(ख) भारते अनेके महापुरुषाः अभवन्।

(ग) महात्मा यथासमयं गृहं गतवान्।

(घ) गुरोः आज्ञया शिष्यः यात्रिणः समीपं गच्छति।

(ङ) जनाः विद्यया नम्रतां प्राप्नुवन्ति।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत – 1×6=6

| | |
|---|---|
| (क) वाचि | (क) कुम्भः |
| (ख) जाड्यम् | (ख) ज्ञानम् |
| (ग) अनृतम् | (ग) अवलोक्य |
| (घ) घटः | (घ) वाण्याम् |
| (ङ) दृष्ट्वा | (ङ) असत्यम् |
| (च) विद्या | (च) मूर्खताम् |

# PAPER IV

अधिकतम अंक 100

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नाम् उत्तराणि लिखत -

अस्मिन् संसारे विविधानां भाषाणां प्रयोगः भवति। तासु भाषासु संस्कारयुक्ता, दोषरहिता, परिष्कृता, वैज्ञानिकी भाषा एव संस्कृतभाषा कथ्यते। इयम् एव भाषा देववाणी, सुरवाणी, गीर्वाणवाणी इति नामाभिः अपि प्रसिद्धा अस्ति। एतानि नामानि एव अस्याः महत्त्वं सूचयन्ति। संस्कृतभाषा संसारस्य प्रायेण सर्वासां भाषाणां जननी अस्ति। तस्मात् एव इयं भाषा सर्वोत्तमा विद्यते। भारतस्य संस्कृतिः सभ्यता संस्कारः च अनया भाषया एव रक्षिताः परिवर्धिताः च भवन्ति। संस्कृतं न केवलम् एका भाषा अपितु ज्ञानविज्ञानयोः निधिः अस्ति। संस्कृतविज्ञानस्य क्षेत्रे भारते एव न अपितु विदेशेषु अपि बहूनि कार्याणि प्रचलन्ति। विशेषतः 'नासा' इति संस्था संस्कृतनिहितानि ज्ञानविज्ञानानि जनमानसे आनेतुं सुलभं च कर्तुम् अनेकानि कार्याणि करोति। यथा-संगणकम्, संगणकाय सर्वासु भाषासु संस्कृतभाषा एव उपयुक्तमा अस्ति इति सर्वे वैज्ञानिकाः मन्यन्ते।

I. एकपदेन उत्तरत - ½×4=2

(i) विविधानां भाषाणां प्रयोगः कुत्र भवति?

(ii) कस्मै सर्वासु भाषासु संस्कृतभाषा एव उपयुक्ततमा अस्ति?

(iii) संस्कृतभाषा संसारस्य प्रायेण सर्वासां भाषाणां का अस्ति?

(iv) संस्कृतभाषा कयोः निधिः अस्ति?

II. पूर्णवाक्येन उत्तरत - 1×2=2

(i) संस्कृतभाषा कैः नामभिः प्रसिद्धा अस्ति?

(ii) 'नासा' इति संस्था कानि कार्याणि करोति?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2

IV. निर्देशानुसारम् उत्तरत - 1×4=4

(क) 'कार्याणि' इति विशेष्यपदस्य विशेषणपदं किम्?

(ख) 'एतानि नामानि एव अस्याः महत्त्वं सूचयन्ति' अस्मिन् वाक्ये क्रियापदं किम्?

(ग) 'दोषयुक्ता' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(घ) 'वैज्ञानिकी भाषा एव संस्कृतभाषा कथ्यते' अस्मिन् वाक्ये अव्ययपदं किम्?

## खण्डः - 'ख' (रचनात्मक-कार्यम्) (10)

2. मित्रं प्रति लिखिते पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत। ½×10=5

प्रिय मित्र तुषार!

सप्रेम (1)..............

अत्र सर्वं (2).............. अस्ति। तत्रापि कुशलम् भवेत्। अद्यैव अहं तव (3).............. प्राप्तवान्। पत्रेण मया अवगतं यत् भवान् (4).............. अष्टनवतिः प्रतिशतम् अङ्कान् प्राप्य उत्तीर्णः अभवत्। संस्कृतविषये तु भवान् (5).............. अङ्कान् लब्धवान्। मित्र! मत्पक्षतः कोटिशः (6).............. स्वीकरोतु। एतत् तु तव (7).............. एव फलम् अस्ति। ईश्वरः अग्रे इतोऽपि अधिकां सफलतां भवते यच्छतु इति एषा मम (8)..............। पितृभ्यां (9).............. प्रणामान् निवेदय। अनुजेभ्यः स्नेहः च।

तव प्रियमित्रम्

(10)..............

मञ्जूषा :

| |
|---|
| अमनः, अष्टमकक्षायाम्, नमो नमः, प्रार्थना, परिश्रमस्य, शतम्, मम, कुशलम्, वर्धापनानि, पत्रं |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5




मञ्जूषा : बालिकाः, पित्रा, विद्यालयं चित्रम्, सह, वृक्षाः, उभयतः, प्राङ्गणे, घासम्, गच्छन्ति।

**खण्डः - 'ग' ( अनुप्रयुक्त-व्याकरणम् )** **(40)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत - 1×4=4

(क) राम+ईश्वरं दक्षिणभारते अस्ति।

(ख) अस्माभिः सदैव जलरक्षणं करणीयम्।

(ग) अहं प्रतिदिनं विद्यालयस्य गृहकार्यं पूर्णं करोमि।

(घ) माता पिता च अतिथेः सु+आगतं करिष्यतः।

5. कोष्ठकेषु प्रदत्तशब्दानाम् उचितरूपेण वाक्येषु रिक्स्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) ........................ पर्वते तपस्यां कुर्वन्ति। (मुनि)

(ख) ........................ आज्ञा सदैव पालनीया। (मातृ)

(ग) पिता ........................ फलानि खादति। (एतत्)

(घ) अस्मिन् कुटीरे एकः ........................ वसति स्म। (साधु)

(ङ) ........................ सर्वत्र आदरः भवति। (विद्वस्)

6. अङ्कानां स्थाने सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्णं वाक्यं लिखत - 1×4=4

(क) (2) ........................ बालकौ वाक्यं पठतः।

(ख) सभागारे (56) ........................ जनाः उपविश्य शास्त्रचर्चां कुर्वन्ति।

(ग) झारखण्डराज्ये (70) ........................ डी.ए.वी. विद्यालयाः सन्ति।

(घ) (100) ....................... जीवेम शरदः।

7. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत–

(क) ........................ अयोध्यायाः राजा रामः आसीत्। 1×5=5

(ख) वृक्षस्य ........................ खगाः निवसन्ति।

(ग) सः छात्रः ........................ गीतं गायति।

(घ) छात्राः भ्रमणाय ........................ गच्छन्ति?

(ङ) यदा त्वं गच्छसि ........................ अहं खेलामि।

मञ्जूषा – | उच्चैः, कदा, पुरा, उपरि, तदा |

8. रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत –

(क) गङ्गा नदी वाराणस्यां प्रवहति। 1×4=4

(ख) महर्षिः दयानन्दः काशीनगरे नि+वसति स्म।

(ग) छात्राः कथां पठित्वा भावम् अवगच्छन्ति।

(घ) छात्रेभ्यः पुनरावृत्तिः अति+आवश्यकी अस्ति।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत –

(क) अध्ययनात् ऋते ज्ञानं न भवति। 1×5=5

(ख) मानवः ईश्वरे विश्वसिति।

(ग) मार्गः विद्यालयस्य पुरतः अस्ति।

(घ) पिता वदति मम पुत्रेभ्यः स्वस्ति।

(ङ) सः नेत्रेण काणः अस्ति।

10. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत –

(क) यथाबलम् ½×6=3

(ख) बहुफलः

(ग) नीलाम्बरः

(घ) अनुरूपम्

(ङ) नीलकण्ठः

(च) प्रत्येकम्

11. कोष्ठकेषु प्रदत्तधातूनाम् उचितरूपेण वाक्येषु रिक्तस्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) त्वं प्रश्नान् अवगत्य शुद्धम् उत्तरं ...................। (लिख्, लट्)

(ख) आचार्यः सस्वरेण श्लोकम् ...................। (वद्, लङ्)

(ग) वयं मिलित्वा कार्यं ...................। (कृ, लृट्)

(घ) साधुः पवित्रं गङ्गाजलं ...................। (पा, विधिलिङ्)

(ङ) सर्वे छात्राः पारितोषिकम् ...................। (लभ्, लङ्)

12. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत - 1×5=5

(क) पिता कार्यालयं गन्तुम् बसयानं स्वीकरोति।

(ख) हस्ती जलं पा+तुमुन् नदीं गच्छति।

(ग) माता वार्तापत्रं पठितवती।

(घ) बकेन एकः मीनः खाद्+क्त।

(ङ) महात्मा विठोवा प्रातःकाले भ्रमित्वा स्नानं करोति।

## खण्डः - 'घ' ( पठित-अवबोधनम् ) (40)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

मासानन्तरम् एकवारं पुनः सः एव पुरुषः महात्मानं गृहम् आगन्तुम् अकथयत्। महात्मा सहजरूपेण तस्य निमन्त्रणं स्वीकृतवान्। एतत् दृष्ट्वा सः पुरुषः महात्मनः चरणयोः अपतत् अश्रूणि प्रवाहमानः च न्यवेदयत् - "महात्मन् मया द्विवारं भवतः अपमानः कृतः परं भवान् किमपि न अकथयत्। पुनः मम निवेदनं स्वीकृतवान्। मया अपराधः कृतः। कृपया मां दण्डयतु"। महात्मा विठोवा शान्तभावेन अवदत् "क्रोधेन कार्यं न सिध्यति। त्वया अपराधः अनुभूतः एतत् एव पर्याप्तम् अस्ति।"

(I) एकपदेन उत्तरत - ½×2=1

(क) सः पुरुषः कतिवारं महात्मन् अपमानम् अकरोत्?

(ख) पुरुषः कस्य चरणयोः अपतत्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) महात्मा विठोवा शान्तभावेन किम् अवदत्?

(ख) मासानन्तरम् एकवारं पुनः किम् अभवत्?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) "भवान् किमपि न अकथयत्" अस्मिन् वाक्ये 'भवान्' इति कर्तृपदस्य क्रियापदं किम्?

(ख) "पुनः मम निवेदनं स्वीकृतवान्" अस्मिन् वाक्ये अव्ययपदं किम्?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

क्षुधासमं नास्ति शरीरपीडनम्,
चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणम्,
क्षमासमं नास्ति शरीररक्षणम्।।

(I) एकपदेन उत्तरत - ½×2=1

(क) क्षमासमं किं नास्ति?

(ख) कया समं शरीरशोषणं नास्ति?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) विद्यासमं किं नास्ति?

(ख) कया समं शरीरपीडनं नास्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'चिन्तासमं शरीरशोषणं न अस्ति' अस्मिन् वाक्ये अव्ययपदं किम्?

(ख) श्लोके 'ज्ञानसमं' इति पदस्य समानार्थकं पदं किम्?

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

सर्वे छात्राः - (उत्थाय) वयं प्रणमामः मान्यवर!

आचार्यः - सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।
(सर्वे उपविशन्ति जिज्ञासया आचार्यं पश्यन्ति।)

आचार्यः - (सर्वान् दृष्ट्वा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे - (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः - अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्तः वदन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा।) अतिशोभनम्, किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

सर्वे - आम् मान्यवर।

(I) एकपदेन उत्तरत - ½×2=1

(क) श्यामपट्टे किं लिखितम् आसीत्?

(ख) सर्वे जिज्ञासया कं पश्यन्ति?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) छात्राः केषां जीवनस्य विषये ज्ञातुम् इच्छन्ति?

(ख) 'अतीव शोभनम्। अवश्यमेव कथयिष्यामि' इति वाक्यं कः कथयति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) अस्मिन् नाटयांशे 'अन्ते' इति पदस्य किं विलोमपदं प्रयुक्तम्?

(ख) 'इयं सूक्तिः' अनयोः पदयोः विशेषणपदं किम्?

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत - ½×10=5

(अ) गतः कालः पुनः न उपैति।

भावार्थः - शीघ्रम् एव (1).................. करणीयानि। (2).................. नष्टः न करणीयः यतः क्षणेन क्षणेन यः समयः (3).................. भवति। सः पुनः न (4)..................। अतः समयस्य (5).................. ज्ञातव्यम्।

मञ्जूषा - | आगच्छति, महत्त्वं, कार्याणि, समयः, व्यतीतः |

(आ) बुद्धिर्यस्य बलं तस्य।

भावार्थः - शास्त्राणां (1).................. एव मनुष्यस्य वास्तविकं बलम् (2).................. ।बुद्ध्या एव (3).................. शक्तिं प्राप्नोति। अतः यः (4).................. अस्ति सः एव (5).................. शक्तियुक्तः अस्ति।

मञ्जूषा - | बुद्धिमान्, वस्तुतः, अस्ति, मनुष्यः, ज्ञानम् |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा <u>पूर्णम् अन्वयं</u> लिखत -½×10=5

(अ) येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।।

अन्वयः - येषां न विद्या न तपः न (1).................. न ज्ञानं न (2).................. न गुणः न (3).................. (च भवति)। ते (जनाः) (4).................. भुवि भारभूताः (5).................. मृगाः (इव) चरन्ति।

(आ) जाड्यं धियो हरति सिञ्चति वाचि सत्यम्,
मानोन्नतिं दिशति पापम् अपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

अन्वयः – सत्सङ्गतिः (1).................. जाड्यं हरति, (2).................. सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् (3).................., चेतः प्रसादयति, दिक्षु (4).................. तनोति, कथय (सत्सङ्गतिः) पुंसाम् किं न (5)..................।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। केवलं क्रमसङ्ख्या न लेखनीया। 1×4=4

(क) मूषकाः शृगालं दृष्ट्वा चकिताः भवन्ति तं महात्मानं मत्वा तस्य सेवां कुर्वन्ति।

(ख) किञ्चित् समयानन्तरं मूषकाः शृगालस्य धूर्ततां ज्ञात्वा तस्य नाशं कुर्वन्ति।

(ग) एकः धूर्तः शृगालः मूषकान् खादितुम् इच्छया तेषां बिलस्य समीपं सूर्यं प्रति मुखं कृत्वा तिष्ठति।

(घ) शृगालः अवसरं लब्ध्वा छलेन प्रतिदिनम् एकं मूषकं खादति।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत। केवलं प्रश्नवाचकं पदं न लेखनीयम् – 1×5=5

(क) एकदा सः गङ्गायाः तटे शिष्यैः सह अतिष्ठत्।

(ख) दयानन्दः अतीव क्षमाशीलः आसीत्।

(ग) महर्षिः शिष्यस्य भावम् अवगत्य अवदत्।

(घ) शरीरस्य महान् रिपुः आलस्यम् अस्ति।

(ङ) सत्यात् न प्रमदितव्यम्।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत – 1×6=6

| | |
|---|---|
| (i) द्वारम् | (क) जननी |
| (ii) आचार्यः | (ख) मेघाः |
| (iii) माता | (ग) कल्याणम् |
| (iv) हिताय | (घ) अदन्ति |
| (v) वारिवाहाः | (ङ) कपाटम् |
| (vi) खादन्ति | (च) गुरुः |

# PAPER V

अधिकतम अंक 100

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

अस्मिन् संसारे सर्वे प्राणिनः सुखम् इच्छन्ति किन्तु इच्छामात्रेण परिश्रमं विना सुखं शान्तिं च नैव लभन्ते। परिश्रमेण मानवः धनं विद्यां यशः सर्वमेव लब्धुं शक्नोति। परिश्रमेणैव निर्धनाः जनाः सम्पन्नाः भवन्ति। वनराजः सिंहः यदि परिश्रमं न कुर्यात् तदा तस्य क्षुधा नैव शान्ता भवति। महाकविः कालिदासः, आदिकविः वाल्मीकिः महर्षिः व्यासश्च परिश्रमेण एव कीर्तिम् अलभन्त। अतः परिश्रमः एव कल्याणस्य मार्गः, शान्तेः मूलम्, उन्नतेः आधारः, सुखस्य सोपानम्, आत्मिक-सन्तुष्टेः च साधनमस्ति।

I. एकपदेन उत्तरत - ½×4=2

(i) सर्वे प्राणिनः किम् इच्छन्ति?

(ii) कं विना सुखं न लभन्ते?

(iii) परिश्रमेण निर्धनाः कीदृशाः भवन्ति?

(iv) कल्याणस्य मार्गः कः अस्ति?

II. पूर्णवाक्येन उत्तरत - 1×2=2

(i) परिश्रमेण मानवः किं प्राप्तुं शक्नोति?

(ii) परिश्रमेण एव के कीर्तिम् अलभन्त?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

IV. निर्देशानुसारम् उत्तरत - 1×4=4

(क) 'सम्पन्नाः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(ख) 'इच्छन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(ग) 'निर्धनाः' इति विशेषणपदस्य विशेष्यपदं किं प्रयुक्तम्?

(घ) 'उद्यमः' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?

## खण्डः - 'ख' ( रचनात्मक-कार्यम् ) (10)

2. स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन्तः मित्रं प्रति लिखिते पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत। ½×10=5

दिल्लीतः

दिनाङ्कः ..................

प्रिय मित्र (1) ...............

सप्रेम (2) ...............

अत्र सर्वं कुशलं वर्तते। तत्रापि कुशलं भवेत्। भवतः पत्रं प्राप्तम्। (3) ............... अस्माकं विद्यालये वार्षिकोत्सवः अभवत्। अतः अहं स्वविद्यालयस्य (4) ............... वर्णयामि। एकमासपूर्वमेव (5) ............... सर्वे अध्यापकाः (6) ............... च कार्येषु व्यस्तताः आसन्। शिक्षानिदेशकः कार्यक्रमस्य (7) ............... आसीत्। सः (8) ............... प्राशंसत् योग्येभ्यः छात्रेभ्यः च (9) ............... अयच्छत्। पितृभ्याम् नमः।

भवतः (10) ...............

क ख ग

मञ्जूषा : | मित्रम्, नमस्ते, कार्यक्रमम्, छात्राः, विद्यालयस्य, अध्यक्षः, पारितोषिकान्, वार्षिकोत्सवम्, गतसप्ताहे, सोमेश |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5




मञ्जूषा : | अवकरं, अवकरपात्रे, मार्जरी, कर्तव्यम्, पर्यावरणं, ग्रामस्य, कर्गदपत्राणि, क्षिपन्ति, वृक्षाः, सर्वेषाम्, स्वच्छता, स्वास्थ्याय |

## खण्डः - 'ग' ( अनुप्रयुक्त-व्याकरणम् ) (40)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत - 1×4=4
   (क) छात्राः पुस्तकालयं गच्छन्ति।
   (ख) 'आचारः परमो धर्मः' इति+उक्त्वा सः विद्वान् अगच्छत्।
   (ग) सज्जनाः सदैव सत्यस्य मार्गम् अनुसरन्ति।
   (घ) कक्षायाम् अद्य संस्कृतविषये एका प्रश्न+उत्तरी आयोजिता।

5. कोष्ठकेषु प्रदत्तशब्दानाम् उचितरूपेण वाक्येषु रिक्स्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5
   (क) आपत्काले ...................... एव कार्यं कर्त्तव्यम्। (मति)
   (ख) जनाः तं ...................... नमन्ति। (साधु)
   (ग) शिशुः ...................... अङ्के उपविशति। (मातृ)
   (घ) सभायां बहवः ...................... सन्ति। (विद्वस्)
   (ङ) अहं ...................... शिलायां स्थास्यामि। (तत्)

6. अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्णं वाक्यं लिखत - 1×4=4
   (क) मम ...................... नासिका अस्ति। (1)
   (ख) कक्षायां ...................... छात्राः पठन्ति। (52)
   (ग) प्रतियोगितायां ...................... बालकाः भागं गृहीतवन्तः। (75)
   (घ) अर्धवार्षिकपरीक्षायाम् अहं संस्कृतविषये ...................... अङ्कान् प्राप्तवान्। (98)

7. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत- 1×5=5
   (क) ...................... पाठं पठ।
   (ख) स्वकार्यात् ...................... प्रमदः।
   (ग) गुणवान् जनः ...................... गुणस्य महत्त्वं जानाति।
   (घ) वृक्षस्य ...................... पथिकः विश्रामं करोति।
   (ङ) ईश्वरः ...................... अस्ति।

   मञ्जूषा - | नीचैः, अधुना, सर्वत्र, मा, एव |

8. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत - 1×4=4
   (क) सुखानि दुःखानि च क्रमानुसारेण आगच्छन्ति गच्छन्ति वा।
   (ख) सज्जनाः सदैव जनान् उपकुर्वन्ति।
   (ग) उत्तमाः जनाः अङ्गीकृतं कार्यं कदापि न परि+त्यजन्ति।
   (घ) कालिदासेन सप्तग्रन्थाः वि+रचिताः।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(क) <u>उद्यानं</u> परितः वृक्षाः सन्ति।

(ख) अर्जुनः <u>धनुर्विद्यायां</u> निपुणः आसीत्।

(ग) <u>वृक्षस्य</u> उपरि खगाः तिष्ठन्ति।

(घ) बालकः <u>गृहात्</u> बहिः कीडति।

(ङ) <u>मित्रेण</u> विना जीवनम् आनन्ददायकं न अस्ति।

10. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत – ½×6=3

(क) अनुरथम्

(ख) महात्मा

(ग) पीताम्बरः

(घ) निर्जनम्

(ङ) प्रतिवर्षम्

(च) जितेन्द्रियः

11. कोष्ठकेषु प्रदत्तधातूनाम् उचितरुपेण वाक्येषु रिक्तस्थानानि पूरयित्वा <u>पूर्णं वाक्यं लिखत</u> – 1×5=5

(क) वयं विद्यालयं गत्वा गुरुन् ..................। (नम्, लट्लकारे)

(ख) त्वं दुर्वचनानि ..................। (त्यज्, लोट्लकारे)

(ग) तत्र स्थित्वा वयं जलं ..................। (पा, लृट्लकारे)

(घ) राधिका ह्यः पुरस्कारम् ..................। (लभ्, लङ्लकारे)

(ङ) यूयं जीवने कदापि पापं न ..................। (कृ, विधिलिङ्लकारे)

12. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा <u>पूर्णं वाक्यं</u> लिखत – 1×5=5

(क) भाषणं <u>श्रुत्वा</u> सर्वे जनाः गृहम् अगच्छन्।

(ख) मम जनकः गङ्गायां <u>स्नातुं</u> हरिद्वारम् अगच्छत्।

(ग) रामेण पुस्तकं <u>पठ्+क्त</u>।

(घ) भक्तः पूजां <u>कृतवान्</u>।

(ङ) किं त्वया रङ्गशाला <u>दृश्+क्त</u>?

## खण्डः – 'घ' ( पठित-अवबोधनम् ) (40)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः यदा भोजनाय तस्य जनस्य गृहम् अगच्छत्। सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्।

(I) एकपदेन उत्तरत – ½×2=1

(क) महात्मा विठोवा किं स्वीकृतवान्?

(ख) महात्मा विठोवा किं विना एव कुटीरं प्रत्यागच्छत्?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) भक्ताः तत्र आगत्य किं कुर्वन्ति स्म?

(ख) यदा महात्मा भोजनाय तस्य जनस्य गृहम् अगच्छत् तदा नागरिकः किम् अकरोत्?

(III) निर्देशानुसारम् उत्तरत – 2

(क) 'दर्शनार्थी नागरिकः' अनयोः पदयोः विशेषणपदं किम्?

(ख) 'वसति स्म' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।

(I) एकपदेन उत्तरत – ½×2=1

(क) नरकस्य कति द्वाराणि कथ्यन्ते?

(ख) किं लोभः नरकस्य द्वारं भवति?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) नरकस्य द्वाराणि कानि भवन्ति?

(ख) नरकस्य द्वारं मानवस्य किं करोति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'कामः क्रोधस्तथा' अस्मिन् वाक्ये अव्ययपदं किम्?

(ख) 'इदं द्वारं' अनयोः पदयोः विशेष्यपदं किम्?

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

आचार्यः - (प्रसन्नोऽस्मि)। अधुना शृणवन्तु - प्रियच्छात्राः। अस्माकं सम्मान्य-पूर्व-राष्ट्रपति-महोदयस्य सम्पूर्णं 'नाम डॉ0 अवुल पाकिर जैनुलबद्दीन अब्दुल कलाम' इति आसीत्। अस्य महोदयस्य जन्म एक-त्रिंशत्-अधिक-एकोन-विंशतिशततमे वर्षे (1931) अक्तूबर-मासस्य पञ्चदशे दिवसे तमिलनाडु-राज्यस्य 'रामेश्वरम्' क्षेत्रे एकस्मिन् सामान्ये परिवारे अभवत्। अस्य महोदयस्य पितुः नाम जैनुलबद्दीनः मारकय्यरः आसीत् मातुः च नाम 'आशियम्मा' आसीत्।

एका छात्रा - मान्यवर! एतेषां महोदयानां शिक्षा कुत्र अभवत्?

आचार्यः - प्रियाः छात्राः। अस्य महोदयस्य आरंभिकी शिक्षा, 'रामेश्वरम्' क्षेत्रे एव 'श्वार्ट्ज़ हाई स्कूल' नामाके विद्यालये अभवत्।

(I) एकपदेन उत्तरत - ½×2=1

(क) डॉ. अब्दुल-कलाम-महोदयस्य मातुः नाम किम् आसीत्?

(ख) कलाम-महोदयस्य शिक्षा कस्मिन् क्षेत्रे अभवत्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) डॉ. कलाम-महोदयस्य सम्पूर्णं नाम किम् आसीत्?

(ख) कलाम महोदयस्य जन्म कदा अभवत्?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'दिने' इति पदस्य किम् पर्यायपदं अत्र प्रयुक्तम्?

(ख) 'मातुः' इति पदस्य विलोमपदं नाट्यांशे प्रयुक्तम्?

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत – ½×10=5

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

भावार्थः – आलस्यं (1) .................. महान् रिपुः अस्ति। यः अस्माकं (2) .................. एव स्थितः अस्ति। वस्तुतः (3) .................. एव अस्माकं (4) .................. भवति यतः एषः अस्माकं पतनं करोति। अतः कदापि आलस्यं मा कुरूत समयेन च (5) .................. कुरूत।

मञ्जूषा – | कार्यम्, शरीरे, मनुष्याणां, आलस्यम्, शत्रुः |

(आ) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

भावार्थः – यथा एकेन एकेन बिन्दुनिपातेन एव (1) .................. जलेन (2) .................. भवति। एवमेव ये (3) .................. सततं (4) .................. कुर्वन्ति, ते शनैः शनैः कार्यकरणेन (5) .................. प्राप्नुवन्ति।

मञ्जूषा – | जनाः, प्रयासं, सफलतां, घटः, पूरितः |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत – ½×10=5

(अ) पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान्प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

अन्वयः – (सन्मित्रं) (1) .................. निवारयति, (2) .................. योजयते, गुह्यं निगूहति (3) .................. प्रकटीकरोति काले (सहयोगं) ददाति, (4) .................. च न जहाति। सन्तः इदं (5) .................. प्रवदन्ति।

(आ) क्षुधासमं नास्ति शरीरपीडनम् चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणं क्षमासमं नास्ति शरीररक्षणम्।।

अन्वयः – क्षुधासमं (1) .................. न अस्ति (2) .................. शरीरशोषणम् न (3) .................. विद्यासमं (4) .................. न अस्ति क्षमासमं (5) .................. न अस्ति।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। केवलं क्रमसङ्ख्या न लेखनीया – 1×4=4

(क) श्रृगालः मूषकवृन्दं दृष्ट्वा तान् खादितुं चिन्तयति।

(ख) श्रृगालः प्रतिदिनम् अवसरं लब्ध्वा एकं मूषकं खादति।

(ग) एकः श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म।

(घ) श्रृगालं हृष्टं पुष्टं दृष्ट्वा मूषकाः मूषकराजं वदन्ति।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा <u>पूर्णं वाक्यं</u> लिखत केवलं प्रश्नवाचकं पदं न लेखनीयम्? 1×5=5

(क) <u>सर्वे</u> सुखिनः भवन्तु।

(ख) महर्षिः दयानन्दः <u>गङ्गायाः</u> तटे अतिष्ठत्।

(ग) <u>गुरोः</u> आज्ञया शिष्यः यात्रिणः समीपम् अगच्छत्।

(घ) <u>सत्यात्</u> न प्रमदितव्यम्।

(ङ) वैरेण <u>वैराणि</u> न शाम्यन्ति।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत – 1×6=6

| | |
|---|---|
| (i) समीक्ष्यते | (क) नादम् |
| (ii) दुर्वचनानि | (ख) विस्मिताः |
| (iii) सुचरितानि | (ग) उद्यमेन |
| (iv) चकिताः | (घ) कटुवचनानि |
| (v) घोषम् | (ङ) सत्कार्याणि |
| (vi) परिश्रमेण | (च) गण्यते |

# PAPER VI

अधिकतम अंक 100

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

एकदा द्वौ धनिकौ आस्ताम्। तयोः धनिकयोः मध्ये विवादः जातः। द्वौ अपि न्यायालयं गतवन्तौ। एकः धनिकः अचिन्तयत्- अहं लक्षं रूप्यकाणि न्यायाधीशाय उत्कोचरूपेण (रिश्वतरूपेण) ददामि इति। सः स्यूते लक्षं रूप्यकाणि स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशः तस्य विचारं ज्ञात्वा क्रुद्धः अभवत्। धनिकः न्यायाधीशम् अवदत्- भोः! मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव। न्यायाधीशः धनिकम् अवदत्- लक्षरूप्यकाणां दातारः कदाचित् अन्ये अपि भवेयुः परन्तु लक्षरूप्यकाणां निराकर्त्तारः मत्सदृशाः अन्ये विरलाः एव। अतः कृपया गच्छतु। न्यायस्थानं मलिनं मा करोतु। लज्जितः धनिकः धनस्यूतं गृहीत्वा ततः निर्गतः।

I. एकपदेन उत्तरत - ½×4=2

(i) कयोः मध्ये विवादः जातः?

(ii) कः लज्जितः भूत्वा निर्गतः?

(iii) द्वौ कुत्र गतवन्तौ?

(iv) धनिकः कति रूप्यकाणि न्यायाधीशाय दातुम् इच्छति स्म?

II. पूर्णवाक्येन उत्तरत - 1×2=2

(i) धनिकः न्यायाधीशं किम् अवदत्?

(ii) न्यायाधीशः धनिकं किम् अवदत्?

III. अस्य अनुच्छेदस्य उपयुक्तशीर्षकं लिखत। 2

IV. निर्देशानुसारम् उत्तरत – 1×4=4

(क) 'अहं लक्षं रूप्यकाणि न्यायाधीशाय ददामि इति' अत्र 'ददामि' क्रियापदस्य कर्तृपदं किम्?

(ख) 'लज्जितः' इति विशेषणपदस्य विशेष्यपदं किम्?

(ग) 'निर्धन' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(घ) 'द्वौ अपि न्यायालयं गतवन्तौ।' अस्मिन् वाक्ये किम् अव्ययपदम्?

## खण्डः – 'ख' (रचनात्मक-कार्यम्) (10)

2. भवत्याः नाम साक्षी अस्ति। भवती स्वविद्यालयस्य वनमहोत्सवस्य वर्णनं कुर्वन्ती स्वमित्रं गीतिकां प्रति पत्रं लिखति पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत। ½×10=5

परीक्षाभवनात्

तिथिः............................

प्रिये ............... (1)

(2) ............... नमस्ते।

ह्यः एव मम विद्यालये (3) ............... आयोजितः। सर्वे छात्राः ............... (4) आसन्। छात्राः स्व-अध्यापकैः सह पादपानाम् ............... (5) व्यस्ताः आसन्। मम विद्यालयस्य परिसरे तु ............... (6) अभवत्। एकादश-द्वादशकक्षयोः छात्राः तु विद्यालयात् बहिः गत्वा ............... (7) उभयतः पादपान् ............... (8)। सर्वे जनाः अस्माकं विद्यालयस्य छात्राणां प्रयासस्य ............... (9) कृतवन्तः। यदि सर्वे विद्यालयाः एवं कुर्युः तर्हि ............... (10) रक्षणं स्यात्।

भवदीया अभिन्ना सखी

साक्षी

मञ्जूषा :

| |
|---|
| हरीतिमा, उत्साहिताः, प्रशंसां, आरोपितवन्तः, गीतिके, |
| मार्गम्, आरोपणे, सस्नेहम्, पर्यावरणस्य, वनमहोत्सवः |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5



| मञ्जूषा : | बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका, तिष्ठन्ति, ध्यानेन शृण्वन्ति, विद्युत्-फलकम् (स्मार्टबोर्ड), महापुरुषाणां चित्राणि, अग्निशमनयन्त्रम्, भित्तौ, कक्षा |
|---|---|

**खण्डः - 'ग' ( अनुप्रयुक्त-व्याकरणम् ) (40)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत - 1×4=4

(क) स्वामी श्रद्धानन्दः गुरुकुल-काँगड़ी विश्वविद्यालयं स्थापितवान्।

(ख) सत्सङ्गतिः मान+उन्नतिं दिशति।

(ग) शृगालः तदैव मूषकान् खादितुं चिन्तयति।

(घ) यदि+अपि महात्मा विठोवा बुभुक्षितः आसीत् तथापि सः क्रोधं न कृतवान्।

5. कोष्ठकेषु प्रदत्तशब्दानाम् उचितरूपेण वाक्येषु रिक्तस्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) एकदा एकः ........................ आसीत् (मुनि)

(ख) उत्तमः बालकः सर्वदा ........................ वचनस्य पालनं करोति। (मातृ)

(ग) ........................ संसारे सर्वे सुखयुक्ताः रोगरहिताः च भवन्तु। (इदम्)

(घ) अहम् एकं ........................ जानामि। (साधु)

(ङ) पुत्रः ........................ वस्त्राणि प्रेषयति। (पितृ)

6. अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य <u>पूर्णं वाक्यं</u> लिखत – 1×4=4

(क) ........................ बालिका नृत्यं करोति। (1)

(ख) मम कक्षायां ........................ छात्राः सन्ति। (53)

(ग) गजः ........................ कदलीफलानि अखादत्। (75)

(घ) उद्याने ........................ वृक्षाः सन्ति। (96)

7. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत <u>पूर्णं च वाक्यं</u> लिखत– 1×5=5

(क) मन्दिरात् ........................ पुष्प-विक्रेता अस्ति।

(ख) भवतः गृहं ........................ अस्ति?

(ग) अद्य सोमवासरः अस्ति ........................ च मङ्गलवासरः भविष्यति।

(घ) यत्र श्रमः भवति ........................ अवश्यमेव साफल्यम् अपि तिष्ठति।

(ङ) ........................ अहं दिल्ल्यां निवसामि।

मञ्जूषा – | तत्र, बहिः, अधुना, कुत्र श्वः |

8. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत – 1×4=4

(क) मार्गे सः सर्वदा कष्टम् <u>अनुभवति</u>।

(ख) सज्जनः धर्मम् <u>आ+चरति</u>।

(ग) सः खडगेन <u>प्रहरति</u>।

(घ) रमेशः <u>प्रति+वदति</u> यत् अहम् अद्यारभ्य सत्यं वदिष्यामि।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(क) <u>मार्गम्</u> उभयतः वृक्षाः सन्ति।

(ख) बालकः <u>पित्रा</u> सह गच्छति।

(ग) <u>वृक्षस्य</u> उपरि वानरः तिष्ठति।

(घ) सजीवकुमारः <u>पाककलायां</u> निपुणः अस्ति।

(ङ) <u>ईश्वरात्</u> ऋते कः अस्मान् रक्षेत्?

10. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत – ½×6=3

(क) उपगङ्गम्

(ख) निर्जनम्

(ग) चक्रपाणिः

(घ) बहुफल:

(ङ) अनुविष्णु

(च) जितेन्द्रिय:

11. कोष्ठकेषु प्रदत्तधातूनाम् उचितरूपेण वाक्येषु रिक्तस्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) बालका: मातरं ...................। (नम्, लट्लकारे)

(ख) यूयम् असत्यभाषणं ...................। (त्यज्, लोट्लकारे)

(ग) आवां लेखं ...................। (लिख्, लृट्लकारे)

(घ) पुत्र: पितरम् ...................। (सेव्, लङ्लकारे)

(ङ) त्वं कदापि दुर्वचनानि न ...................। (वद्, विधिलिङ्लकारे)

12. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत - 1×5=5

(क) शिष्यस्य भावम् अवगत्य महर्षि: अकथयत्।

(ख) नागरिक: महात्मानं गृहम् आ+गम्+तुमुन् अकथयत्।

(ग) मया समयेन गृहकार्यं कृतम्।

(घ) महात्मा यथासमयं तस्य गृहं गम्+क्तवतु।

(ङ) श्रृगाल: भोजनं प्राप्तुम् इतस्तत: भ्रमति स्म।

## खण्ड: - 'घ' (पठित-अवबोधनम्) (40)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

एकदा एकस्मिन् वने एक: श्रृगाल: भोजनं प्राप्तुम् इतस्तत: भ्रमति स्म। तदैव स: मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति। तस्य मूषकसमूहस्य राजा हृष्ट-पुष्ट: आसीत्। श्रृगाल: मूषकसमूहम् अनुसरति। तान् खादितुम् इच्छन् स: मूषकाणां बिलस्य समीपं गच्छति। स: श्रृगाल: किञ्चित् चिन्तयित्वा मूषकाणां बिलात् बहि: सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति। अन्यस्मिन् दिवसे प्रात: मूषका: श्रृगालं दृष्ट्वा चकिता: भवन्ति। मूषकराज: तं पृच्छति-भवान् एवं किमर्थं स्थित: अस्ति? श्रृगाल: अवदत्-यदि अहं चतुर: पादान् धरायां स्थापयिष्यामि तदा पृथ्वी अध: गमिष्यति। अत: एव अहम् एवं स्थित: अस्मि।

(I) एकपदेन उत्तरत - ½×2=1

(क) श्रृगाल: कुत्र भ्रमति स्म?

(ख) मूषकसमूहस्य राजा कीदृश: आसीत्?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) मूषकराजः शृगालं किम् अपृच्छत्?

(ख) शृगालः किम् अवदत्?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'एकदा एकस्मिन् वने एकः शृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म।' अस्मिन् वाक्ये शृगालः इति कर्तृपदस्य क्रियापदं किम्?

(ख) 'राजा हृष्ट-पुष्टः' अनयोः पदयोः विशेष्यपदं किम्?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य, सफलं तस्य जीवितम्।।

(I) एकपदेन उत्तरत – ½×2=1

(क) वाणी कीदृशी स्यात्?

(ख) क्रिया कीदृशी भवेत्?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) कस्य जीवितं सफलं भवति?

(ख) का दानवती स्यात्?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'जीवनम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(ख) 'श्रमवती क्रिया' अनयोः पदयोः विशेष्यपदं किम्?

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

अष्टमी कक्षा। संस्कृतस्य कक्षा। सर्वे छात्राः कक्षायां परस्परं चर्चायां मग्नाः सन्ति। श्यामपट्टे एका सूक्तिः लिखिता अस्ति –

"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः"

(तदैव मान्यवरः संस्कृतस्य अध्यापकः कक्षां प्रविशति।)

सर्वे छात्राः – (उत्थाय) वयं प्रणमामः मान्यवर!

आचार्यः – सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।

(सर्वे जिज्ञासया आचार्यं पश्यन्ति।)

आचार्यः – (सर्वान् दृष्टा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे – (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

(I) एकपदेन उत्तरत – ½×2=1

(क) कस्य विषयस्य कक्षा अस्ति?

(ख) तदैव कः कक्षां प्रविशति?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) आचार्यः सर्वान् दृष्टवा किं पृच्छति?

(ख) सर्वे मिलित्वा किं वदन्ति?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'किं भवन्तः' किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति' अस्मिन् वाक्ये भवन्तः इति कर्तृपदस्य क्रियापदं किम्?

(ख) 'शिक्षकः' इति पदस्य पर्यायपदं नाट्यांशात् चित्वा लिखत।

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत – ½×10=5

(क) शरीरमाद्यं खलु धर्मसाधनम्।

भावार्थः – वयं ..................(1) कार्याणि शरीरेण एव कुर्मः। ..................(2) एव अस्माकं सर्वेषाम् एव ..................(3) प्रमुखसाधनम् अस्ति। शरीरं धर्मस्य ..................(4) साधनम् अस्ति। अतः ..................(5) सदा स्वस्थाः भवेयुः।

मञ्जूषा – | पालनस्य, कर्तव्यानां, शरीरेण, सर्वाणि, शरीरम् |

(आ) चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च।

भावार्थः – ..................(1) जीवनं सदैव ..................(2) न भवति। ..................(3) सदैव सुखमयं न भवति। मनुष्यस्य ..................(4) सुखस्य दुःखस्य च स्थितिः चक्रम् इव भवति। सुखानि दुःखानि च ..................(5) आगच्छन्ति गच्छन्ति वा।

मञ्जूषा – | जीवने, दुःखमयं, क्रमानुसारेण, मनुष्यस्य एवमेव |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत –½×10=5

(अ) सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभाग् भवेत्।।

अन्वयः – सर्वे ..................(1) भवन्तु, ..................(2) निरामयाः सन्तु, सर्वे ..................(3) पश्यन्तु, कश्चित् ..................(4) मा ..................(5)।

(आ) पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः।।

अन्वयः – नद्यः स्वयम् एव ..................(1) न पिबन्ति, वृक्षाः स्वयं ..................(2) न खादन्ति, ..................(3) सस्यं खलु (स्वयं) न ..................(4), सतां विभूतयः ..................(5) (भवन्ति)।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। (केवलं क्रमसङ्ख्या न लेखनीया।) 1×4=4

(क) एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्।

(ख) रात्रौ महात्मा विठोवा बुभुक्षितः एव अतिष्ठत्।

(ग) यदा महात्मा नागरिकस्य गृहं गतवान् तदा सः कुत्रचित् गतः आसीत्।

(घ) महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत। (केवलं प्रश्नवाचकं पदं न लेखनीयम्।) 1×5=5

(क) महर्षिः दयानन्दः काशीनगरे अतिष्ठत्।

(ख) यात्री महर्षेः कुटीरस्य समीपम् अगच्छत्।

(ग) जन्मभूमिः माता इव अस्ति।

(घ) महर्षिः भारते अभ्रमत्।

(ङ) मया द्विवारं भवतः अपमानः कृतः।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत – 1×6=6

| | |
|---|---|
| (i) निरामयाः | (क) सत्कार्याणि |
| (ii) उपास्यानि | (ख) रोगरहिताः |
| (iii) सुचरितानि | (ग) नादम् |
| (iv) अनवद्यानि | (घ) सज्जनाः |
| (v) सुकृतिनः | (ङ) पालनीयानि |
| (vi) घोषम् | (च) अनिन्दनीयानि |

# PAPER VII

अधिकतम अंक 80

**खण्डः–'क' (अपठित–अवबोधनम्)** **(10 अङ्काः)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत–

भारतवर्षे अनेके धर्मप्रचारकाः समाजसुधारकाः च अभवन्। तेषु महर्षिः दयानन्दः प्रमुखः आसीत्। अस्य जन्म गुजरातराज्यस्य काठियावाडप्रदेशस्य टङ्कारानामके ग्रामे अभवत्। अस्य नाम पूर्वं मूलशङ्करः आसीत्। अस्य पिता श्रीकर्षणमहोदयः आसीत्। एकदा मूलशङ्करः शिवरात्रौ शिवप्रतिमायाम् एकं मूषकम् अपश्यत्। तद् दृष्ट्वा तस्य हृदये वास्तविक–शिवस्य विषये जिज्ञासा अभवत्। वास्तविकं शिवं ज्ञातुं सः गृहं त्यक्त्वा संन्यासी अभवत्। महर्षिः दयानन्दः मथुरायां गुरुं श्रीविरजानन्दम् उपगम्य शिक्षाम् गृहीतवान्। दयानन्दः अन्धविश्वासं निवारयितुं ''सत्यार्थप्रकाशः'' इति ग्रन्थम् अरचयत्।

I. एकपदेन उत्तरत– ½×4=2

(i) कः शिवप्रतिमायाम् मूषकम् अपश्यत्?

(ii) दयानन्दस्य गुरोः नाम किम् आसीत्?

(iii) महर्षिदयानन्दस्य पूर्वं किम् नाम आसीत्?

(iv) महर्षेः दयानन्दस्य पितुः नाम किम् आसीत्?

II. एकवाक्येन उत्तरत– 1×2=2

(i) दयानन्दस्य जन्म कुत्र अभवत्?

(ii) महर्षिः दयानन्दः कुत्र शिक्षां गृहीतवान्?

III. अस्य अनुच्छेदस्य उपयुक्तशीर्षकं लिखत। 2×1=2

IV. निर्देशानुसारम् उत्तरत– 1×4=4

(i) 'एकदा मूलशङ्करः शिवरात्रौ शिवप्रतिमायाम् एकं मूषकम् अपश्यत्' इत्यस्मिन् वाक्ये किम् अव्ययपदम् अस्ति?

(क) एकदा (ख) एकम् (ग) मूषकम्

(ii) 'अरचयत्' इति क्रियापदस्य कर्तृपदं किम्?

(क) ग्रन्थम् (ख) दयानन्दः (ग) अन्धविश्वासम्

(iii) 'विलोक्य' इति पदस्य कः पर्यायः गद्यांशे प्रयुक्तः?

(क) त्यक्त्वा (ख) दृष्ट्वा (ग) उपगम्य

(iv) 'प्रमुखः' इति विशेषणपदस्य किं विशेष्यपदं गद्यांशे प्रयुक्तम्?

(क) महतेषु (ख) संन्यासी (ग) दयानन्दः

**खण्डः–'ख' (रचनात्मक-कार्यम्)** **(10 अङ्काः)**

2. भवतः अनुजः हार्दिकः सर्वदा चलभाषियन्त्रेण वार्तालापं करोति। अस्य यन्त्रस्य अति-प्रयोगः न लाभकारी इति सम्बोधयन् अनुजं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः <u>उत्तरपुस्तिकायां लिखत</u>–

½×10=5

(i) ..........................।

तिथिः .......................

प्रिय अनुज हार्दिक !

(ii) .........................।

पित्रा लिखितं (iii) ...................... अद्यैव प्राप्तम्। पत्रेण (iv) ..................... यत् (v) ................. सर्वदा एव चलभाषियन्त्रेण (vi) ..................... करोति। एतत् तु न उचितम्। अनेन तु समयस्य (vii) ......... .............. भवति। पठनस्य समयः अपि (viii) ..........................। अतः अस्य अति प्रयोगः तु (ix) .......................... एव। भवान् पुनः एवं कालं न नंक्ष्यति इति मम आशा अस्ति।

भवतः (x) ................................

वैभवः

मञ्जूषा

| |
|---|
| ज्ञातम्, भ्राता, परीक्षाभवनात्, शुभाशिषः, वार्तालापम्, भवान्, हानिः, हानिकारकः, विनश्यति, पत्रम् |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– 1×5=5



मञ्जूषा

| |
|---|
| वर्षाकाल:, मेघा:, बाला:, कर्गदनौका, चालयति, वर्षायाम्, पादपा:, |
| वृद्धा:, कृषका:, वृष्ट्या, आनन्दम् अनुभवन्ति, गृहाणि, छत्रम्, पुष्पाणि |

***अथवा***

**(प्रज्ञाचक्षुर्भ्य:)**

'वर्षाकाल:' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत– 1×5=5

मञ्जूषा

| |
|---|
| आकाशे, वर्षाकाल:, मेघा:, प्रसन्ना: बाला:, कृषका:, क्षेत्रेषु, |
| बीजानि, सर्वत्र, हरीतिमा, वपन्ति, ग्रीष्मस्य, ताप:, नश्यति, वर्षन्ति, गर्जन्ति |

**खण्ड:–'ग' (अनुप्रयुक्त–व्याकरणम्)** **(30 अङ्का:)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत– 1×4=4

(क) अद्यैव वा मरणमस्तु युगान्तरे वा।

(ख) महा + ऋषि: भारते सर्वत्र अभ्रमत्।

(ग) चन्द्र: रजनीश: भवति।

(घ) यदि + अपि महात्मा विठोवा बुभुक्षित: आसीत् तथापि स: क्रोधं न कृतवान्।

5. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्य: उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत– 1×4=4

(क) एकदा एक: ...................... नगरे भ्रमति स्म।

(i) साधव: (ii) साधू (iii) साधु:

(ख) श्रीकृष्णस्य ........................ नाम देवकी आसीत्।

(i) माता (ii) मातुः (iii) मात्रा

(ग) ........................... नगरे सर्वत्र शान्तिः अस्ति।

(i) एतत् (ii) एतस्य (iii) एतस्मिन्

(घ) राजा ........................... वस्त्राणि यच्छति।

(i) मुनये (ii) मुनिम् (iii) मुनिः

6. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्णं वाक्यं लिखत– 1×4=4

(क) ............................ महिला नृत्यं करोति। (1)

(ख) मम कोषे ............................ रूप्यकाणि सन्ति। (54)

(ग) ........................... बालकाः स्वच्छताभियाने भागं गृहीतवन्तः। (86)

(घ) उद्याने .......................... फलवृक्षाः सन्ति। (100)

7. अधोलिखितवाक्येषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत– 1×4=4

(क) ईश्वरः तु ....................... विद्यमानः अस्ति।

(ख) अहम् ......................... देहल्याम् एव निवसामि।

(ग) ........................ सोमवासरः आसीत्।

(घ) जलात् .......................... मीनः न जीवति।

मञ्जूषा – | ह्यः, सर्वत्र, ऋते, अपि |

8. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– 1×4=4

(क) परिश्रमं विना सफलता न सम्भवति।

(ख) रमेशः मित्रेण सह क्रीडति।

(ग) भवनस्य उपरि ध्वजः अस्ति।

(घ) महेशः पठने निपुणः अस्ति।

9. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत– 1×4=4

(क) शिष्याः गुरुं ............................।

(i) नमति (ii) नमामः (iii) नमन्ति

(ख) अहं मिथ्याभाषणं ............................।

(i) त्यक्ष्यामि (ii) त्यक्ष्यति (iii) त्यक्ष्यसि

(ग) यूयं लेखं ............................।

(i) लिखेत् (ii) लिखेः (iii) लिखेत

(घ) तौ पुरस्कारम् ............................।

(i) अलभथाः (ii) अलभताम् (iii) अलभन्त

10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत– 1×3=3

(क) छात्राः पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छन्ति।

(ख) बालकः पाठं पठ् + क्त्वा क्रीडति।

(ग) मया अपराधः कृ + क्त ।

11. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत– 1×3=3

(क) वृद्धः एकाकी निवसति ।

(ख) सः कष्टम् अनु + भवति।

(ग) जनाः प्रातःकाले उद्यानेषु वि + हरन्ति ।

## खण्डः–'घ' (पठित-अवबोधनम्) (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

अन्यस्मिन् दिवसे प्रातः मूषकाः शृगालं दृष्ट्वा चकिताः भवन्ति। मूषकराजः तं पृच्छति–"भवान् एवं किमर्थं स्थितः अस्ति?" शृगालः अवदत्–"यदि अहं चतुरः पादान् धरायां स्थापयिष्यामि तदा पृथ्वी अधः गमिष्ययति। अतः एव अहम् एवं स्थितः अस्मि।" अन्यमूषकः पृच्छति–"भवतः मुखं सूर्यं प्रति किमर्थम् अस्ति? मुखं च किमर्थम् उद्घाटितम् अस्ति?" शृगालः वदति–"सूर्यं पूजयितुं मम मुखं सूर्यं प्रति अस्ति। वायुं च भक्षयितुम् उद्घाटितम् अस्ति। वायुः एव मम भोजनम् अस्ति।"

I. एकपदेन उत्तरत– ½×2=1

(क) कं पूजयितुं शृगालस्य मुखं सूर्यं प्रति अस्ति?

(ख) मूषकाः कं दृष्ट्वा चकिताः भवन्ति?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) अन्यमूषकः किं पृच्छति?

(ख) शृगालः किं वदति?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'अन्यस्मिन् दिवसे प्रातः मूषकाः शृगालं दृष्ट्वा चकिताः भवन्ति। ' अस्मिन् वाक्ये 'भवन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(i) अन्यस्मिन् (ii) मूषकाः (iii) शृगालम्

(ख) 'यदि अहं चतुरः पादान् धरायां स्थापयिष्यामि तदा पृथ्वी अधः गमिष्यति।'। अस्मिन् वाक्ये 'चतुरः' इति विशेषणपदस्य विशेष्यपदं किम्?

(i) अहम् (ii) धरायाम् (iii) पादान्

13. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।

नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः।।

I. एकपदेन उत्तरत– ½x2=1

(क) काः स्वयमेव अम्भः न पिबन्ति?

(ख) के स्वयं फलानि न खादन्ति?

II. पूर्णवाक्येन उत्तरत– 1x2=2

(क) सतां विभूतयः किमर्थं भवन्ति?

(ख) वारिवाहाः किं न अदन्ति?

III. निर्देशानुसारम् उत्तरत– 1x2=2

(क) 'जलम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(i) अम्भः (ii) स्वयम् (iii) वारिवाहाः

(ख) 'खादन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(i) नद्यः (ii) वृक्षाः (iii) वारिवाहाः

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

अन्यः छात्रः – किम् एते महोदयाः अस्माकं राष्ट्रस्य ''वैज्ञानिक-परामर्शदातारः'' अपि अभवन्?

आचार्यः – आम्। अष्टनवति-अधिक-एकोनविंशतिशततमे वर्षे (1998) एतेषां महोदयानां नियुक्तिः अस्मिन् पदे अभवत्।

अन्या छात्रा – अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानं 'भारतरत्नम्' अपि एते महोदयाः प्राप्तवन्तः।

आचार्यः – आम्। सप्तनवति-अधिक-एकोनविंशतिशततमे वर्षे (1997) महोदयः इदं सम्मानं प्राप्तवान्। अयं महानुभावः स्वगुणानुरूपम् अस्माकं राष्ट्रस्य राष्ट्रपतेः पदम् अलङ्कृतवान्। अतीव प्रेरणादायकम् आसीत् अस्य महोदयस्य जीवनम्।

I. एकपदेन उत्तरत– ½×2=1

(क) अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानं किम् अस्ति?

(ख) अस्य महोदयस्य जीवनं कीदृशम् आसीत्?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) अयं महानुभावः स्वगुणानुरूपम् किं पदम् अलङ्कृतवान्?

(ख) महोदयानां नियुक्तिः वैज्ञाानिक-परामर्शदातुः पदे कदा अभवत्?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'भारतरत्नम् अपि एते महोदयाः' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) भारतरत्नम् (ii) अपि (iii) महोदयाः

(ख) 'एते महोदयाः अस्माकं राष्ट्रस्य वैज्ञानिक-परामर्शदातारः अपि अभवन्' अस्मिन् वाक्ये क्रियापदं किम्?

(i) महोदयाः (ii) अभवन् (iii) अस्माकम्

15. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत–

(क) सर्वे भवन्तु सुखिनः। ½×4=2

भावार्थः – अस्मिन् संसारे (1) .................... सुखं प्राप्नुयुः इति एव (2) ................ इच्छा अस्ति। अस्मिन् संसारे (3) ........................ दुःखी न भवेत्। सर्वे (4) ...................... भवेयुः।

मञ्जूषा

| |
|---|
| कोऽपि, अस्माकम्, सुखयुक्ताः, सर्वे |

(ख) गतः कालो न पुनरुपैति। ½×4=2

भावार्थः – शीघ्रम् एव (1) .................. करणीयानि। (2) .................... नष्टः न करणीयः, यतः क्षणेन क्षणेन यः समयः (3) ................... भवति सः (4) ................... न आगच्छति। अतः समयस्य महत्त्वं ज्ञातव्यम्।

मञ्जूषा

| |
|---|
| समयः, कार्याणि, पुनः, व्यतीतः |

16. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत– 1×4=4

(क) शिष्याः विस्मिताः अभवन्।

(ख) महर्षिः भारते अभ्रमत्।

(ग) महात्मा सहजरूपेण तस्य निमन्त्रणं स्वीकृतवान्।

(घ) मया द्विवारं भवतः अपमानः कृतः।

17. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत– 1×4=4

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।

उत्तमा मानमिच्छन्ति मानो हि महतां धनम्।।

अन्वयः अधमाः (1) .................... इच्छन्ति, (2) ................. धनम् मानम् च इच्छन्ति,

उत्तमाः (3) .................... इच्छन्ति, मानः हि (4) .................. धनम् (भवति)।

18. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत– ½×6=3

| | | | |
|---|---|---|---|
| (i) | अवगत्य | (क) | सत्कार्याणि |
| (ii) | समीक्ष्यते | (ख) | पालय |
| (iii) | सुचरितानि | (ग) | अन्यानि |
| (iv) | चर | (घ) | गण्यते |
| (v) | इतराणि | (ङ) | पालनीयानि |
| (vi) | उपास्यानि | (च) | ज्ञात्वा |

# PAPER VIII

अधिकतम अंक 80

**खण्डः–'क' (अपठित–अवबोधनम्)** **(10 अङ्काः)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत–

मनसः आत्मनः च संस्कारः परिष्कारः इति संस्कृतिः कथ्यते। संस्कृतिः मनः निर्मलं करोति। विश्वसंस्कृतिषु भारतीयसंस्कृतिः प्राचीनतमा गौरवशालिनी च वर्तते। अनेकाः संस्कृतयः आगताः निर्गताः च, किन्तु भारतीयसंस्कृतिः अद्यापि अक्षुण्णा। भारतीयसंस्कृतेः आदर्शवाक्यानि–'सर्वे भवन्तु सुखिनः', 'वसुधैव कुटुमबकम्', 'अहिंसा परमो धर्मः', 'आत्मवत् सर्वभूतेषु' इत्यादीनि सन्ति। भारतीयसंस्कृतिः धर्मप्रधाना, वर्णाश्रम–व्यवस्थायुक्ता च अस्ति। कर्मफलं, पुर्नजन्म, मोक्षवादः च अस्याः प्रमुखाः सिद्धान्ताः सन्ति। सत्यस्य त्यागस्य अहिंसायाः च अत्र महत्त्वं वर्तते।

I. एकपदेन उत्तरत– ½×4=2

(क) मनसः आत्मनः च संस्कारः किं कथ्यते?

(ख) का अद्यापि अक्षुण्णा?

(ग) संस्कृतिः किं निर्मलं करोति?

(घ) अहिंसा कीदृशः धर्मः?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) भारतीयसंस्कृतेः कानि आदर्शवाक्यानि सन्ति?

(ख) भारतीयसंस्कृतेः प्रमुखाः सिद्धान्ताः के सन्ति?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

IV. निर्देशानुसारम् उत्तरत– 1×4=4

(क) 'आगताः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

1. निर्गताः 2. अक्षुण्णा 3. प्राचीनतमा

(ख) 'सर्वे' इति कर्तृपदस्य क्रियापदं किम्?

1. सुखिनः 2. भवन्तु 3. सन्ति

(ग) 'मनः' इति विशेष्यपदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

1. मनसः 2. आत्मनः 3. निर्मलम्

(घ) 'अनेकाः संस्कृतयः आगताः निर्गताः च' अस्मिन् वाक्ये किम् अव्ययपदम् अस्ति?

1. अनेकाः 2. च 3. आगताः

**खण्डः–'ख' (रचनात्मक–कार्यम्)** **(10 अङ्काः)**

2. मित्रं प्रति लिखिते पत्रे मञ्जूषायाः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत–

½×10=5

दिल्लीतः

दिनाङ्कः ..................

प्रिय मित्र (1) .......................

सप्रेम नमस्ते।

अत्र कुशलं (2) ........................। तव परीक्षायाः सफलतायाः पत्रम् अधुना एव प्राप्तम्। तव (3) .... .................. ज्ञात्वा अहम् अतीव प्रसन्नः अस्मि। (4) ......................परिश्रमं कृत्वा त्वम् अष्टम्यां कक्षायां नवनवतिः (99) प्रतिशत-अङ्कान् (5) .................। त्वम् अलिखः यत् तव (6) ...................... नवमकक्षायां संस्कृतविषयं न अस्ति किन्तु त्वम् अग्रे संस्कृतभाषां पठितुम् इच्छसि। (7) ..................... मा कुरू। भवान् एव स्वविद्यालये एतदर्थं प्रयासं कृत्वा (8) .................... संस्कृतं प्राप्नोतु। अहं तव उज्ज्वलभविष्याय (9) .......................... करोमि।

मातापितृचरणेषु प्रणामाः।


(10) .......................... अभिन्नं मित्रम्

रमेशः

मञ्जूषा

| |
|---|
| तव, लब्धवान्, कामनां, विद्यालये, चिन्तां, |
| गौरव, सफलतां, नवमकक्षायां, तत्रास्तु, कठिनं |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– 1×5=5



मञ्जूषा

| |
|---|
| महिला:, माता, स्नेहेन, कार्याणि, पर्यावरणं, ग्रामस्य, वसन्ति, कुक्कुटा:, वृक्षा:, पश्यति, स्वच्छता, पशव: |

***अथवा***

**(प्रज्ञाचक्षुर्भ्य:)**

'क्रीडाया: महत्त्वम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखन्तु– 1×5=5

मञ्जूषा

| |
|---|
| क्रीडा, क्रीडनम्, स्वास्थ्याय, हितकरम्, शरीरस्य, मानसिक:, विकास:, एकाग्रता, मैत्री, अनुशासनम्, सहयोगस्य, भावना, परस्परम्, राष्ट्रीयस्तरे, विश्वस्तरे, प्रसिद्धि: |

**खण्ड:–'ग' (अनुप्रयुक्त-व्याकरणम्) (30 अङ्का:)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत– 1×4=4

(क) दीपोत्सव: कार्तिकमासस्य अमावस्यां भवति।

(ख) पुरा मुनय: भिक्षा + अटनं कुर्वन्ति स्म।

(ग) सदैव धर्मं चर।

(घ) प्रति + एकं पाठं ध्यानेन पठेयु:।

5. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा <u>पूर्णवाक्यं</u> लिखत– 1×4=4

(क) पुत्रः ...................... नमति।

1. पितरं 2. पितुः 3. पिता

(ख) पुरा भारते ........................ सम्मानम् अभवत्।

1. साधूनां 2. साधुम् 3. साधवः

(ग) ........................... कवयः सन्ति।

1. एषः 2. एतस्मात् 3. एते

(घ) त्वम् इदं कार्यं ........................... कुरू।

1. मति 2. मत्या 3. मतयः

6. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य <u>पूर्णवाक्यं</u> लिखत– 1×4=4

(क) वेदाः ............................ सन्ति। (4)

(ख) ............................. जनाः सभायां तिष्ठन्ति। (90)

(ग) उद्याने ........................... पुष्पाणि विकसन्ति। (75)

(घ) मम समीपे संस्कृतस्य .......................... ग्रन्थाः सन्ति। (52)

7. अधोलिखितवाक्येषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयित्वा <u>पूर्णवाक्यं</u> लिखत– 1×4=4

(क) विद्यालये ........................ अवकाशः भविष्यति।

(ख) ......................... स्वामी दयानन्दः काशीनगरे अगच्छत्।

(ग) ज्ञानात् ......................... न मुक्तिः।

(घ) अहम् ......................... संस्कृतं पठामि।

मञ्जूषा – | ऋते, अपि, एकदा, श्वः |

8. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– 1×4=4

(क) अध्यापकः छात्राय पुस्तकं यच्छति।

(ख) पिता पुत्रे विश्वसिति।

(ग) मित्रेण सह अहम् अपि आपणम् अगच्छम्।

(घ) विद्यालयस्य पुरतः देवालयः अस्ति।

9. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत– 1×4=4

(क) यूयं दुर्गुणान् ............................।

1. त्यजतु 2. त्यज 3. त्यजत

(ख) ते धनं ............................।

1. अलभन्त 2. अलभत 3. अलभध्वम्

(ग) शिशुः दुग्धं ............................।

1. पिबसि 2. पिबति 3. पिबामि

(घ) वयं प्रतिदिनं ईश्वरं ...........................।

1. नमेम 2. नमेयुः 3. नमेत्

10. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत– 1×3=3

(क) वयं विद्यालयं गम् + तुमुन् इच्छामः।

(ख) छात्रः पाठं पठित्वा खेलति।

(ग) वाल्मीकिना रामायणं रच् + क्त ।

11. अधोलिखितवाक्येषु रेखाङ्क्तिपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत– 1×3=3

(क) छात्रः प्रश्नार्थं गुरुम् उप + गच्छति ।

(ख) राजा धनं वितरति।

(ग) सुपुत्रेण कुलं शोभते।

**खण्डः–'घ' (पठित-अवबोधनम्)** **(30 अङ्काः)**

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्।

I. एकपदेन उत्तरत– ½×2=1

(क) महात्मा विठोवा कं निर्माय वसति स्म?

(ख) महात्मा विठोवा कदा बुभुक्षितः एव अतिष्ठत्?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) भक्ताः तस्य दर्शनाय आगत्य किं कुर्वन्ति स्म?

(ख) नागरिकः किमर्थं महात्मानं प्रार्थयत्?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'गन्तुम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?

1. निर्माय 2. आवृत्य 3. आगन्तुम्

(ख) 'महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्।' अत्र 'महात्मा विठोवा' इति कर्तृपदस्य क्रियापदं किम् अस्ति?

1. प्रत्यागच्छत्  2. भोजनं  3. कुटीरं

13. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

क्षुधासमं नास्ति शरीरपीडनम्, चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणम्, क्षमासमं नास्ति शरीररक्षणम्।।

I. एकपदेन उत्तरत– ½×2=1

(क) क्षमासमम् किं न अस्ति?

(ख) शरीरस्य सर्वाधिकं शोषणं का करोति?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) क्षुधा किं करोति?

(ख) शरीरस्य सर्वोत्तमम् आभूषणं किं भवति?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'बुभुक्षा' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

1. चिन्ता  2. क्षुधा  3. क्षमा

(ख) 'शरीरभूषणम्' इति पदस्य श्लोके किं प्रयुक्तम्?

1. क्षुधासम्  2. चिन्तासमम्  3. विद्यासमम्

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

सर्वे छात्राः – (उत्थाय) वयं प्रणमामः मान्यवर।

आचार्यः – सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।

(सर्वे उपविशन्ति। जिज्ञासया आचार्यं पश्यन्ति।)

आचार्यः – (सर्वान् दृष्ट्वा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे – (मिलित्वा) आम् मान्यवर ! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः – अतीव शोभनम्। अवश्यमेव कथयिष्यामि प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्तः पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

सर्वे – आम् मान्यवर!

आचार्यः – (प्रसन्नोऽस्मि)। अधुना शृण्वन्तु–प्रियच्छात्राः। अस्माकं सम्मान्य-पूर्व-राष्ट्रपति-महोदयस्य सम्पूर्णं नाम 'डॉ. अबुल पाकिर जैनुलबद्दीन अब्दुल कलाम' इति आसीत्।

I. एकपदेन उत्तरत– ½×2=1

(क) सर्वे छात्राः कं नमन्ति?

(ख) श्यामपट्टे का लिखिता अस्ति?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) सर्वे मिलित्वा किं ज्ञातुम् इच्छन्ति?

(ख) डॉ. कलाम महोदयस्य सम्पूर्णं नाम किम् आसीत्?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'प्रारम्भे अहं कथयिष्यामि।' अत्र 'कथयिष्यामि' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

1. प्रारम्भे 2. अहं 3. भवन्तः

(ख) 'इयं सूक्तिः' अनयोः पदयोः विशेषणपदं किम् अस्ति?

1. इयं 2. सूक्तिः 3. किम्

15. मञ्जूषायाम् प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा <u>पूर्णं भावार्थं</u> लिखत–

(क) शरीरमाद्यं खलु धर्मसाधनम्। ½×4=2

भावार्थः – वयं सर्वाणि कार्याणि शरीरेण एव कुर्मः। (1) .................... एव अस्माकं सर्वेषाम् एव (2) .................. प्रमुखं साधनम् अस्ति। धर्मस्य (3) ................. साधनम् अस्ति। अतः शरीरेण सदा (4) ..................... भवेयुः।

मञ्जूषा

| स्वस्थाः, शरीरम्, कर्त्तव्यानाम्, पालनस्य |
|---|

(ख) कृण्वन्तो विश्वमार्यम्। ½×4=2

भावार्थः – वयं सर्वे मिलित्वा सम्पूर्णं (1) ................. आर्यम् करवाम। अस्य अयम् आशयः अस्ति यत् केवलम् एकं (2) ..................., एकं ग्रामम् अथवा एकं राष्ट्रम् एव (3) .............. अर्थात् श्रेष्ठं न कुर्याम अपितु विश्वस्य सर्वेषां जनानां (4) ................... दूरीकृत्य वयं सम्पूर्णं विश्वम् एव आर्यं करिष्यामः।

मञ्जूषा

| आर्यम्, विश्वम्, दोषान्, जनम् |
|---|

16. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत– 1×4=4

(क) सन्मित्रं गुणान् प्रकटीकरोति।

(ख) शिष्याः क्रुद्धाः अभवन्।

(ग) देवपितृकार्याभ्यां मा प्रमदितव्यम्।

(घ) यात्री महर्षेः कुटीरस्य समीपे अगच्छत्।

17. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत– 1×4=4

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु

लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।

अद्यैव वा मरणमस्तु युगान्तरे वा

न्यायात्पथः प्रविचलन्ति पदं न धीराः।।

अन्वयः नीतिनिपुणाः यदि (1) .................... स्तुवन्तु वा, लक्ष्मीः समाविशतु (2) ................. वा गच्छतु, मरणम् अद्यैव अस्तु (3) .................... वा, धीराः न्यायात् पथः (4) ................ न प्रविचलन्ति।

18. अधोलिखितानां पदानां उचितार्थैः सह मेलनं कृत्वा लिखत– ½×6=3

| | | | |
|---|---|---|---|
| (i) | सुचरितानि | (क) | प्रणम्य |
| (ii) | धीराः | (ख) | धरा |
| (iii) | सन्तः | (ग) | अनिन्दनीयानि |
| (iv) | नत्वा | (घ) | धैर्यवन्तः |
| (v) | अनवद्यानि | (ङ) | सत्कार्याणि |
| (vi) | पृथ्वी | (च) | सज्जनाः |

# PAPER IX

अधिकतम अंक 80

**खण्ड:–'क' (अपठित–अवबोधनम्)** **(10 अङ्का:)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

शिक्षा मानवजीवनस्य महती आवश्यकता अस्ति। शिक्षां प्राप्य एव कश्चित् जनः मनुष्यः भवति। विद्याहीनः जनः तु पशुः कथ्यते। प्राचीनकाले गुरुकुलस्य परम्परा आसीत्, परन्तु अधुना सा परम्परा दुर्लभा अभवत्। इदानीं तु अनेके विद्यालयाः महाविद्यालयाः विश्वविद्यालयाः च सन्ति। परन्तु तेषु वैदेशिक–शासनकालीना एव शिक्षाव्यवस्था प्रचलति। आधुनिक–शिक्षाव्यवस्थायां मातृभाषायाः राष्ट्रभाषायाः च अधिकं महत्त्वं न अस्ति। येन छात्राः नैतिकमूल्यानां जीवनमूल्यानां च उचितं ज्ञानं न प्राप्नुवन्ति। शिक्षाव्यवस्था मूल्य–आधारिता भवेत्, सर्वेभ्यः हितकरी अपि स्यात्।

I. एकपदेन उत्तरत– ½×4=2

(क) कीदृशः जनः पशुः कथ्यते?

(ख) शिक्षा केभ्यः हितकरी स्यात्?

(ग) किं प्राप्य कश्चित् जनः मनुष्यः भवति?

(घ) शिक्षा कस्य महती आवश्यकता अस्ति?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) प्राचीनकाले कस्य परम्परा आसीत्?

(ख) छात्राः केषाम् उचितं ज्ञानं न प्राप्नुवन्ति?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2

IV. निर्देशानुसारम् उत्तरत– 1×4=4

(क) 'महत्त्वम्' इति विशेष्यपदस्य विशेषणपदं किम्?

(i) अस्ति (ii) अधिकम् (iii) न

(ख) 'विद्याहीनः जनः एव पशुः कथ्यते' अस्मिन् वाक्ये क्रियापदं किम्?

(i) विद्याहीनः (ii) पशुः (iii) कथ्यते

(ग) 'सुलभा' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) दुर्लभा (ii) इदानीम् (iii) व्यवस्था

(घ) 'तेषु वैदेशिक-शासनकालीना एव शिक्षाव्यवस्था प्रचलति' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) शिक्षाव्यवस्था (ii) प्रचलति (iii) एव

## खण्डः-'ख' (रचनात्मक-कार्यम्) (10 अङ्काः)

2. मित्रं प्रति लिखिते पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत– ½×10=5

प्रिय मित्र मनीष !

सप्रेम ............1.............

अत्र सर्वं ............2............. अस्ति। तत्रापि कुशलम् स्यात् इति मम कामना अस्ति। अद्यैव अहं तव ..........3............. प्राप्तवान्। पत्रं पठित्वा ज्ञातवान् यत् भवान् ............4............. पञ्चनवतिः प्रतिशतम् अङ्कान् प्राप्य उत्तीर्णः अभवत्। संस्कृतविषये तु भवान् ............5............. अङ्कान् लब्धवान्। मित्र ! मत्पक्षतः कोटिशः ............6............. स्वीकरोतु। एतत् तु तव ............7............ एव फलम् अस्ति। ईश्वरः अग्रे इतोऽपि अधिकां सफलतां भवते यच्छतु इति एषा मम ............8.............। पितृभ्यां ............9..... ........ प्रणामान् अनुजेभ्यः स्नेहं च वदतु।


तव प्रियमित्रम्

............10.............

मञ्जूषा

| |
|---|
| कामना, परिश्रमस्य, अनुरागः अष्टमकक्षायाम्, नमो नमः, |
| शतम्, मम, कुशलम्, वर्धापनानि, पत्रं |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– 1×5=5



मञ्जूषा

| |
|---|
| नदी, जनाः, तरन्ति, वार्तालापम्, क्रीडतः, नदीतीरे, वृक्षः वृक्षस्य, व्यायामम्, शीतलम्, जलम्, अधः, नद्याम् |

***अथवा***

**(प्रज्ञाचक्षुर्भ्यः)**

'वृक्षाणां महत्त्वम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत– 1×5=5

मञ्जूषा

| |
|---|
| वृक्षाः, पर्यावरणम्, उपकारं, कुर्वन्ति, रक्षन्ति, फलानि, काष्ठानि, पृथिव्याः, श्रृङ्गारं, प्राणिभ्यः, प्राणवायुं, वृक्षाणाम्, जीवनाय, महत्त्वं, रक्षणीयाः |

**खण्डः–'ग' (अनुप्रयुक्त–व्याकरणम्) (30 अङ्काः)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत– 1×4=4

(क) अस्माकं विद्यालये <u>वार्षिक</u> + <u>उत्सवः</u> भविष्यति।

(ख) हिमालयः भारतस्य <u>सदैव</u> रक्षां करोति।

(ग) यद्यपि समाजे कुरीतिः अस्ति <u>तथापि</u> जनाः सम्यग् आचरन्ति।

(घ) कार्यक्रमे भवतां <u>सु + आगतम्</u> अस्ति।

5. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानानि पूरयित्वा च पूर्णं वाक्यं लिखत– 1×4=4

(क) ...................... गङ्गातटे तपस्यां कुर्वन्ति।

(i) मुनिः (ii) मुनौ (iii) मुनयः

(ख) ........................ आज्ञा सदैव पालनीया।

(i) पिता (ii) पितरम् (iii) पितुः

(ग) साधुः ........................... फलानि खादति।

(i) इदम् (ii) इमानि (iii) इमे

(घ) अस्मिन् पर्वते ........................... निवसन्ति स्म।

(i) साधुम् (ii) साधवे (iii) साधवः

6. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्णं वाक्यं लिखत– 1×4=4

(क) ............................ युवकौ वाक्यं लिखतः। (2)

(ख) ............................. विद्वांसः चर्चां कुर्वन्ति। (79)

(ग) हिमाचलप्रदेशस्य एकस्मिन् विद्यालये ........................... अध्यापिकाः सन्ति। (91)

(घ) .......................... जनाः पद्मपुरस्कारेण सम्मानिताः। (85)

7. अधोलिखितवाक्येषु मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत– 1×4=4

(क) स्वामिदयानन्दाय ......................।

(ख) गायकः ........................ गीतं गायति।

(ग) युवकाः भ्रमणाय ....................... गच्छन्ति?

(घ) सिंहः वने ........................ भ्रमति।

मञ्जूषा

| |
|---|
| उच्चैः, नमः, इतस्ततः, कदा |

8. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– 1×4=4

(क) ज्ञानात् ऋते उद्योगः न भवति।

(ख) मानवः ईश्वरे विश्वसिति।

(ग) विद्यालयम् अभितः वृक्षाः पादपाः च सन्ति।

(घ) आचार्यः कथयति – छात्रेभ्यः स्वस्ति।

9. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानानि पूरयित्वा च पूर्णं वाक्यं लिखत– 1×4=4

(क) सर्वे छात्राः प्रश्नपत्राणि पठित्वा उत्तराणि ...........................।

(i) लिखसि (ii) लिखति (iii) लिखन्ति

(ख) वयं श्लोकं ...........................।

(i) रचयाम (ii) रचयामि (iii) रचयानि

(ग) युवां मिलित्वा कार्यं ...........................।

(i) करिष्यति (ii) करिष्यामः (iii) करिष्यथः

(घ) भारतस्य सैनिकाः सदा ...........................।

(i) अशोभन्त (ii) अशोभथाः (iii) अशोभामहि

10. अधोलिखितवाक्येषु प्रकृति–प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत– 1×3=3

(क) छात्राः गृहं गन्तुं बसयानं स्वीकुर्वन्ति।

(ख) एका बालिका कवितां पठितवती।

(ग) अध्यापिका उत्तराणि लिख् + क्त्वा पश्यति।

11. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत– 1×3=3

(क) यमुना नदी देहल्यां प्र + वहति।

(ख) चटका एकस्मिन् वृक्षे नि + वसति स्म।

(ग) पर्यावरणस्य सुरक्षा अत्यावश्यकी अस्ति।

## खण्डः–'घ' (पठित–अवबोधनम्) (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

एकः मूषकः मूषकराजं प्रणम्य अवदत्–महाराज! सः श्रगालः वायुं भक्षयित्वा अपि हृष्टः पुष्टः अभवत्। परन्तु अस्माकं सङ्ख्या न्यूना जाता। वयं शङ्काशीलाः स्मः। मूषकराजः तान् अवदत्–अहम् अपि एवं चिन्तयामि मम शङ्का श्रगालस्य उपरि एव अस्ति। अहम् अवश्यम् एव अस्य कारणं ज्ञास्यामि। भवन्तः अधुना गच्छन्तु। अग्रिमे दिवसे योजनानुसारं सर्वे मूषकाः दूरं गच्छन्ति। मूषकराजः तत्र एकाकी एव तिष्ठति। इदं दृष्ट्वा श्रगालः तं मूषकराजं प्रहरति। सावधानः मूषकराजः कूर्दित्वा श्रगालं प्रहरति। तदैव सर्वे मूषकाः तत्र आगच्छन्ति। श्रगालं च आक्रम्य तीक्ष्णदन्तैः तस्य नाशं कुर्वन्ति। सत्यम् एव कथ्यते यत् ''अविश्वस्ते न विश्वसेत्''।

I. एकपदेन उत्तरत— ½×2=1

(क) मूषकराजः कूर्दित्वा कं प्रहरति?

(ख) कः एकाकी एव तिष्ठति?

II. पूर्णवाक्येन उत्तरत— 1×2=2

(क) श्रगालः किं भक्षयित्वा अपि हृष्टः पुष्टः अभवत्?

(ख) सर्वे मूषकाः कथं श्रगालस्य नाशं कुर्वन्ति?

III. निर्देशानुसारम् उत्तरत— 1×2=2

(क) 'मूषकः मूषकराजं प्रणम्य अवदत्' अस्मिन् वाक्ये क्रियापदं किम्?

(i) मूषकः (ii) मूषकराजं (iii) अवदत्

(ख) 'श्रगालः वायुं भक्षयित्वा अपि हृष्टः पुष्टः अभवत्' अस्मिन् वाक्ये 'श्रगालः' इति पदस्य विशेषणपदं किम्?

(i) अपि (ii) हृष्टः (iii) वायुं

13. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत—

पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः ॥

I. एकपदेन उत्तरत— ½×2=1

(क) नद्यः स्वयमेव किं न पिबन्ति?

(ख) केषां विभूतयः परोपकाराय भवन्ति?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) के अन्नं न अदन्ति?

(ख) वृक्षाः स्वयं कानि न खादन्ति?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) "न खादन्ति फलानि वृक्षाः" अस्मिन् वाक्ये अव्ययपदं किम्?

(i) खादन्ति (ii) न (iii) वृक्षाः

(ख) "मेघाः" इति पदस्य समानार्थकं पदं श्लोके किं प्रयुक्तम्?

(i) वारिवाहाः (ii) सताम् (iii) परोपकाराय

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

अन्यः छात्रः – किम् एते महोदयाः अस्माकं राष्ट्रस्य 'वैज्ञानिक-परामर्श-दातारः' अपि अभवन्?

आचार्यः – आम्। अष्टनवति-अधिक-एकोनविंशतिशततमे वर्षे (1998) एतेषां महोदयानां नियुक्तिः अस्मिन् पदे अभवत्।

अन्यः छात्रः – अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानम् 'भारतरत्नम्' अपि एते महोदयाः प्राप्तवन्तः।

आचार्यः – आम्। सप्तनवति-अधिक-एकोनविंशतिशततमे वर्षे (1997) महोदयः इदं सम्मानं प्राप्तवान्। अयं महानुभावः स्वगुणानुरूपम् अस्माकं राष्ट्रस्य राष्ट्रपतेः पदम् अलङ्कृतवान्। अतीव प्रेरणादायकम् आसीत् अस्य महोदयस्य जीवनम्।

I. एकपदेन उत्तरत– ½×2=1

(क) 'भारतरत्नम्' कीदृशं नागरिकं सम्मानम् अस्ति?

(ख) एते महोदयाः कस्य 'वैज्ञानिक–परामर्श–दातारः अपि अभवन्?

II. पूर्णवाक्येन उत्तरत– 1×2=2

(क) अतीव प्रेरणादायकम् किम् आसीत्?

(ख) अयं महोदयः 'भारतरत्नम्' इति सम्मानं कदा प्राप्तवान्?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) अस्मिन् नाटयांशे 'अपमानम्' इति पदस्य विलोमपदं संवादे किं प्रयुक्तम्?

(i) जीवनम् (ii) सम्मानम् (iii) भारतपदम्

(ख) ''महोदयः इदं सम्मानं प्राप्तवान्'' अत्र 'प्राप्तवान्'' इति क्रियापदस्य कर्तृपदं किम्?

(i) महोदयः (ii) सम्मानम् (iii) इदम्

15. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत– ½×4=2

(क) चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च।

भावार्थः – मनुष्यस्य जीवनं सदैव दुःखमयं न (1) ..........................। एवमेव सदैव (2) ........................न भवति। (3) ............................ जीवने सुखस्य दुःखस्य च स्थितिः (4) ...................... इव भवति। सुखानि च दुःखानि च क्रमानुसारेण आगच्छन्ति गच्छन्ति वा।

मञ्जूषा

| |
|---|
| चक्रम्, भवति, मनुष्यस्य, सुखमयं |

(ख) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः। ½×4=2

भावार्थः – अस्माकं (1) ................ अस्माकं शरीरे एव अस्ति। एषः शत्रुः कः? (2) .............। आलस्यम् एव वस्तुतः (3) .................. शत्रुः अस्ति। अतः आलस्यं मा (4) ................।

मञ्जूषा

| |
|---|
| अस्माकम्, कुरुत, शत्रुः, आलस्यम् |

16. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत– 1×4=4

(क) एकः यात्री <u>महर्षेः</u> कुटीरस्य समीपम् आगच्छत्।

(ख) महर्षिदयानन्दः <u>प्रचुरफलानि</u> अयच्छत्।

(ग) महात्मा विठोवा एकस्मात् नगरात् बहिः <u>कुटीरे</u> वसति स्म।

(घ) अनुशासनहीनः तु <u>क्रोधेन</u> दण्डनीयः एव।

17. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत– 1×4=4

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्,
मानोन्नतिं दिशति पापम् अपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किं न करोति पुंसाम् ।।

अन्वयः सत्सङ्गतिः धियः (1) .................... हरति, वाचि (2) .................. सिञ्चति, मानोन्नतिं दिशति, पापम् (3) .................., चेतः प्रसादयति, दिक्षु (4) .................. तनोति, कथय (सत्सङ्गतिः) पुंसाम् किं न करोति।

18. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत– ½×6=3

| | | | |
|---|---|---|---|
| (i) | विद्या | (क) | जननी |
| (ii) | आचार्यः | (ख) | असत्यम् |
| (iii) | माता | (ग) | अवलोक्य |
| (iv) | दृष्ट्वा | (घ) | सफलं भवति |
| (v) | अनृतम् | (ङ) | ज्ञानम् |
| (vi) | सिध्यति | (च) | गुरुः |

❐❐❐

# PAPER X

**पूर्णाङ्काः – 80**

**खण्डः–'क' (अपठित–अवबोधनम्)** **(10 अङ्काः)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत–

आधुनिकयुगे प्रदूषणस्य समस्या प्रतिदिनं वर्धते एव। कुत्रापि स्वच्छः वायुः न प्राप्यते। न स्वच्छं जलं लभते। अद्यत्वे यन्त्रालयानां धूमेन सम्पूर्णवायुमण्डलं दूषितम् अभवत्। दूषितः वायुः एव श्वासेन हृदयं प्रविशति। अतः विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः, नेत्ररोगाः च जनान् पीडयन्ति। वायुप्रदूषणस्य प्रमुखतमं कारणम् औद्योगिकविकासः अस्ति। वृक्षाणां विनाशं कृत्वा जनाः औद्योगिकक्षेत्राणां विकासं तु कुर्वन्ति किन्तु ते प्रकृतिदेवीमपि पीडयन्ति। अतः वयं सर्वे मिलित्वा प्रदूषणसमस्यायाः समाधानं करिष्यामः।

I. एकपदेन उत्तरत– ½×4=2

(i) दूषितः वायुः केन हृदयं प्रविशति?

(ii) वयं कस्याः समाधानं करिष्यामः?

(iii) वायुप्रदूषणस्य प्रमुखं कारणं किम् अस्ति?

(iv) अद्यत्वे केषां धूमेन वायुमण्डलं दूषितम् अभवत्?

II. एकवाक्येन उत्तरत– 1×2=2

(i) वायुप्रदूषणेन के के रोगाः भवन्ति?

(ii) जनाः केन प्रकारेण प्रकृतिदेवीं पीडयन्ति?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

IV. निर्देशानुसारम् उत्तरत– 1×4=4

(क) 'दूषितः वायुः एव श्वासेन्' इत्यस्मिन् वाक्ये किम् अव्ययपदम् अस्ति?

(i) दूषितः (ii) वायुः (iii) एव

(ख) 'कुर्वन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(i) विकासम् (ii) तु (iii) जनाः

(ग) 'दूषितः' विशेषणपदस्य किं विशेष्यपदं गद्यांशे प्रयुक्तम्?

(i) वायुः (ii) विविधाः (iii) जलम्

(घ) 'मलिनम्' इति पदस्य कः विपर्ययः गद्यांशे प्रयुक्तम्?

(i) मिलित्वा (ii) वायुः (iii) स्वच्छम्

## खण्डः–'ख' (रचनात्मक-कार्यम्) (10 अङ्काः)

2. अनुजं प्रति लिखिते पत्रे मञ्जूषायाः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत– ½×10=5

प्रिय सुशान्त !

तिथिः .......................

सप्रेम (1) .......................

अत्र कुशलं (2) .........................। सुशान्त ! मानवजीवनस्य प्रत्येकं क्षणं (3) ....................... अस्ति। संसारे प्रकृतेः सम्पूर्णानि (4) ...................... नियमितसमये भवन्ति। उचितसमये यदि वृष्टिः न भवेत् तदा (5) ................. शुष्कं भवेत्। तथैव बाल्यकाले यदि छात्रः न पठति तदा सः समस्तजीवने (6) ..... ................. करोति। समयः तस्य एव जनस्य (7) ...................... करोति यः समयस्य (8) ................

करोति। समयः कदापि कस्यचिदपि (9) ........................... न करोति। अतः सदा समयस्य सदुपयोगं कुर्यात्।


(10) ........................... अग्रजः

अतुलः

मञ्जूषा

| |
|---|
| महत्त्वपूर्णम्, सर्वत्र, भवताम्, प्रतीक्षाम्, तत्रास्तु, सदुपयोगम्, कार्याणि, पश्चात्तापम्, सहायताम्, नमोनमः |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– 1×5=5



मञ्जूषा

| |
|---|
| पर्वताः, सूर्योदयः, गृहे, जले, मत्स्यौ, वृक्षौ, गृहे पुष्पाणि, तरतः, वातावरणं, रविकिरणाः |

**अथवा**

'मधुरा प्रभातवेला' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत– 1×5=5

मञ्जूषा

| |
|---|
| प्रभातवेला, मधुरा, सूर्यः, उदेति, खगाः, जनाः, भ्रमणं, व्यायामं, धावन्ति, कुर्वन्ति, कूजन्ति, स्वकार्येषु, लग्नाः, बालकाः, विद्यालयं, भवन्ति, गच्छन्ति |

**खण्डः–'ग' (अनुप्रयुक्त–व्याकरणम्)** **(30 अङ्काः)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत– 1×4=4

(क) अधुना सूर्योदयः भवति।

(ख) यदि + अपि त्वं वीरः असि तथापि धैर्यं धारय।

(ग) स्वभाव एवैष परोपकारिणाम्।

(घ) न + अस्ति विद्यासमं चक्षुः।

5. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत– 1×4=4

(क) ...................... सदैव पूज्याः भवन्ति।

(i) मातरौ (ii) मातरम् (iii) मातरः

(ख) रामः प्रतिदिनं ......................... नमति।

(i) पितरम् (ii) पित्रे (iii) पित्रा

(ग) वने ............................ तपः कुर्वन्ति।

(i) मुनिः (ii) मुनिना (iii) मुनयः

(घ) ............................ बालिकायाः नाम माधवी अस्ति।

(i) अस्यै (ii) अस्याः (iii) अस्याम्

6. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य <u>पूर्णवाक्यं</u> लिखत– 1×4=4

(क) पुस्तकालये संस्कृतस्य .............................. पुस्तकानि सन्ति। (90)

(ख) पाण्डवाः .............................. आसन्। (5)

(ग) क्रीडाक्षेत्रे ............................ धावकाः धावन्ति। (72)

(घ) सभायाम् ............................ विद्वांसः उपस्थिताः सन्ति। (66)

7. अधोलिखितवाक्येषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयित्वा <u>पूर्णवाक्यं</u> लिखत– 1×4=4

(क) रात्रौ कुक्कुराः ......................... धावन्ति।

(ख) कक्षायाम् .......................... न वदेत्।

(ग) ......................... महाकविः कालिदासः संस्कृतस्य महान् कविः अभवत्।

(घ) ते बालाः ग्रामं .......................... अगच्छन्?

मञ्जूषा – | उच्चैः, किमर्थम्, इतस्ततः, पुरा |

8. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– 1×4=4

(क) <u>नगरम्</u> उभयतः नदी वहति।

(ख) <u>विद्यालयात्</u> बहिः देवालयः अस्ति।

(ग) <u>कृष्णाय</u> नमः।

(घ) गुरुः <u>छात्रे</u> विश्वसिति।

9. कोष्ठकेषु प्रदत्तधातूनाम् उचितरूपैः रिक्तस्थानानि पूरयित्वा <u>पूर्णवाक्यं</u> लिखत– 1×4=4

(क) त्वं स्वच्छं जलम् एव ............................।

(i) पिबतु (ii) पिबत (iii) पिब

(ख) कमला पितुः पत्रम् ............................।

(i) अलभत (ii) अलभे (iii) अलभध्वम्

(ग) वयम् एतस्य अभिनयं ............................।

(i) कुर्यात् (ii) कुर्याम (iii) कुर्युः

(घ) छात्राः श्लोकान् ...........................।

(i) लेखिष्यन्ति (ii) लेखिष्यतः (iii) लेखिष्यामः

10. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत– 1×3=3

(क) वयं मिष्ठान्नं खादितुं सज्जाः स्मः।

(ख) सः प्र + हस् + ल्यप् कथयति।

(ग) बालकः भ्रमितवान्।

11. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत– 1×3=3

(क) छात्रः विषयम् अव + गच्छति।

(ख) महेशस्य प्रयत्नः वृथा न भविष्यति।

(ग) सत्यं सदा वि + जयते।

**खण्डः–'घ' (पठित-अवबोधनम्) (30 अङ्काः)**

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्।

I. एकपदेन उत्तरत– ½×2=1

(क) महात्मा विठोवा कस्मात् बहिः वसति स्म?

(ख) के महात्मनः दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म?

II. एकवाक्येन उत्तरत– 1×2=2

(क) एकदा महात्मा रात्रौ कीदृशः अतिष्ठत्?

(ख) नागरिकः किम् आवृत्य कुत्रचित् गतः आसीत्?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'विठोवा' इति विशेष्यपदस्य विशेषणपदं किम्?

(i) तस्य (ii) महात्मा (iii) तम्

(ख) 'महात्मा विठोवा तस्य निवेदनम् स्वीकृतवान्' अस्मिन् वाक्ये 'विठोवा' इति कर्तृपदस्य क्रियापदं किम्?

(i) निवेदनम् (ii) तस्य (iii) स्वीकृतवान्

13. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

येषां न विद्या न तपो न दानम् ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति ।।

I. एकपदेन उत्तरत– ½×2=1

(क) मनुष्यरूपेण के चरन्ति?

(ख) गुणरहिताः जनाः कुत्र भाररूपेण भ्रमन्ति?

II. एकवाक्येन उत्तरत– 1×2=2

(क) मनुष्यरूपेण मृगाः इव के चरन्ति?

(ख) निर्गुणजनाः कस्य रूपेण पशवः इव चरन्ति?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'पृथिव्यां' इति अर्थे श्लोके किम् पदं प्रयुक्तम्?

(i) गुणः (ii) भुवि (iii) धर्मः

(ख) 'अज्ञानम्' इति पदस्य श्लोके किं विलोमपदं प्रयुक्तम्?

(i) दानम् (ii) शीलम् (iii) ज्ञानम्

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

आचार्यः – (सर्वान् दृष्ट्वा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे – (मिलित्वा) आम् मान्यवर ! वयम् अस्माकं पूर्व-राष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः – अतीव शोभनम्। अवश्यमेव कथयिष्यामि प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्तः पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

I. एकपदेन उत्तरत– ½x2=1

(क) आचार्यः किं दृष्ट्वा सूक्तिं पठति?

(ख) 'अतीव शोभनम्'। एतत् कः अवदत्?

II. एकवाक्येन उत्तरत– 1×2=2

(क) छात्राः कस्य विषये ज्ञातुम् इच्छन्ति?

(ख) आचार्यः सर्वान् दृष्ट्वा किम् अकथयत्?

III. निर्देशानुसारम् उत्तरत– 1×2=2

(क) 'मध्ये-मध्ये भवन्तः पृच्छन्तु।' अत्र 'पृच्छन्तु' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(i) भवन्तः (ii) मध्ये (iii) पृच्छन्तु

(ख) 'प्रारम्भे अहं कथयिष्यामि'। अस्मिन् वाक्ये 'अन्ते' शब्दस्य किं विलोमपदं प्रयुक्तम्?

(i) कथयिष्यामि (ii) अहम् (iii) प्रारम्भे

15. मञ्जूषायाम् प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत–

(क) मा भ्राता भ्रातरं द्विक्षत्। ½×4=2

भावार्थः – जनेषु परस्परं (1) ...................... भवेत् न तु द्वेषः। जनाः कदापि (2) ................. सह ईर्ष्यां न (3) ..........................। सर्वे जनाः परस्परं (4) ....................... एव संसारे वसेयुः।

मञ्जूषा

| |
|---|
| कुर्वन्तु, भ्रातृभावः, मिलित्वा, केनापि |

(ख) अर्धो घटो नूनम् उपैति घोषम्। ½×4=2

भावार्थः – अर्धः पूरितः (1) ................... एव अधिकं शब्दं करोति। एवमेव यः (2) .............. न अस्ति सः एव (3) .................... प्रदर्शनं करोति। (4) .................... एव बहु वदन्ति न तु विद्वांसः।

मञ्जूषा

| |
|---|
| विद्वान्, ज्ञानस्य, घटः, मूर्खाः |

16. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत– 1×4=4

(क) उत्तमाः मानम् इच्छन्ति?

(ख) दुर्वचनानि श्रुत्वा अपि महर्षिः तूष्णीम् अतिष्ठत्।

(ग) मूषकाः बिलं प्रविशन्ति।

(घ) जनाः कार्येषु आलस्यं न कुर्वन्तु।

17. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत– 1×4=4

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

अन्वयः (सन्मित्रं) पापात् निवारयति, हिताय (1) .................... गुह्यं निगूहति गुणान्
(2) .................। काले (सहयोगं) ददाति, आपद्गतं च न (3) ....................।
सन्तः इदं (4) .................. प्रवदन्ति।

18. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत– ½×6=3

| | |
|---|---|
| (क) शरदः | (क) धैर्यवन्तः |
| (ख) लक्ष्मीः | (ख) आयुः |
| (ग) वयः | (ग) वर्षम् |
| (घ) अवगत्य | (घ) प्रणम्य |
| (ङ) धीराः | (ङ) धनम् |
| (च) नत्वा | (च) ज्ञात्वा |